ISSN 0976-8645

जाह्नवी

# JAHNAVI SANSKRIT E-JOURNAL

*A portal of Sarasvatniketanam*




www.sarasvatniketanam.org www.jahnavisanskritejournal.in

## नवचत्वारिंशदङ्के भवतां समेषां मङ्गलाभिनन्दनम् ।

**July-Sep-2022**



| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति-डा.सदानन्दझाः । |
| **सम्पादकाः** | विद्वान् सुमन् आचार्यः, डा. बिपिनकुमारझा, डा. दीपिका दीक्षितश्च । |
| **विशिष्टपुनर्वीक्षकाः** | प्रो. पीयूषकान्तदीक्षितः, डा. मधुकेश्वरभट्टः, डा. गणेश टी. पण्डितः, डा. सुनील के एस्. च |
| **प्रकाशकः** | सारस्वतनिकेतनम् |
| **लोकार्पणकर्ता** | प्रो. विजयकुमारकर्णमहोदयः, संकायप्रमुखः बालकल्याणसंकाय-नवनालन्दामहाविहारस्य |
| **लोकार्पणप्रतिनिधिः** | डा. सरिताश्रीवास्तवः |
| **लोकार्पणस्थलम्** | Seminar Hall, Netaji Subhash Chandra Bose Govt. Girls PG College Aliganj Lucknow |
| **तकनीकिप्रवन्धनसहायकः** | रिज़ वेब होस्टिंग, बंगलोर |



सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः ।

# विषयानुक्रमणिका





| Sl. | शीर्षकम् | लेखकः |
|---|---|---|
| | मुख्यसम्पादकीयम् | डा. सदानन्द झा |
| | प्रकाशकीयम् | डा. बिपिन कुमार झा |
| 1 | काव्यप्रकाशस्य अप्रकाशितटीकानां विवरणम् | अनसूया महराणा |
| 2 | संस्कृतच्छात्राणां सत्रार्धपाठ्यक्रमे सततमूल्याङ्कनप्रणाल्याः अनुप्रयोगः : एकं विश्लेषणात्मकम् अध्ययनम् । | डा. गणेश टि. पण्डितः |
| 3 | नाथानां यौगिकी शक्तिः | डा. के. एस्. सुमन् |
| 4 | विविधशास्त्रानुसारेण वाक्यलक्षणम् | डॉ सुभाष चन्द्र मीणा |
| 5 | परोपकार का प्रतीक : गौ माता | डॉ० विवेक शर्मा |
| 6 | ब्रह्मसाक्षात्कार की प्रक्रिया | प्रो. रणजित् कुमार बर्मन |
| 7 | काव्यगुणालोचनावसरे श्रीमहेशचन्द्रन्यायरत्न-जीवानन्दविद्यासागरविरचितयोः टीकयोः तुलनात्मकसमीक्षणम् | लोकनाथदासः |
| 9 | शक्ति उपासना : तात्विक विमर्श | डा. दीपिका दीक्षित |
| 10 | इक्कीसवीं शताब्दी में टीका परम्परा | डॉ.राधावल्लभ शर्मा |
| 8 | वैदिक शिक्षा पद्धति के पुनरुत्थान में महर्षि दयानन्द सरस्वती का योगदान | अनामिका, डॉ पुष्पेंद्र जोशी |
| 11 | वैदिक नदी असिक्नी के विविधार्थक सन्दर्भ | पद्मा ठाकुर |
| 12 | The Legends: As described in Purānas | Dr. Nilachal Mishra |
| 13 | आधुनिककाले वृक्षायुर्वेदस्य महत्वम् | डा ईश्वर प्रसाद ए |
| 14 | भारतीयवास्तु का विकास क्रम : एक अवलोकन | रिपुदमन चंद्र |
| 15 | महाकवि पुष्पदन्त के महापुराण में भगवान नेमिनाथ का जीवन चरित्र एवं साधना | कोमल चन्द्र जैन |
| 16 | शास्त्रालोकेन विवेचितस्य सात्वतधर्मस्य संक्षिप्तमालोचनम् | सुस्मिता गोस्वामी |
| 17 | शिक्षा और संवेगात्मक बुद्धि | विजय कुमार झा |
| 18 | सौतान्त्रिक दर्शने 'परमार्थ' -विचारः | डॉ. सोनल सिंहः |

# सम्पादकीयम्

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदयकलुषपुञ्जं प्रक्षिपन्ती विदूरे।
सघनतमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुवि भव्या भारती काऽपि दिव्या॥

अये मान्यमान्याः विविधविद्या विद्योतितान्तःकरणा सुरसरस्वतीस्नेहसम्भृतस्वान्ताः शास्त्रमन्थनसमुत्थरसास्वाददक्षाः गुणैकपक्षपातिनः संस्कृतानुरागिणो पाठकाश्च।

संसारस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकजाह्नव्या पत्रिकाया ऊनपञ्चाशदङ्कमिममधुना द्रुहिणगृहिणी सपर्यारतानां विदुषां तत्रभवतां श्रीमतामनारतसंस्कृत समाराधनतत्पराणामाचार्याणां करकमलयोः सादरं सस्नेहं समर्पयन् नितरां प्रमोदमनुभवामि।
विदाङ्कुर्वन्त्येव भवन्तः यत् स्थापितपरम्परानुसारेण पत्रिकायाः लोकार्पणकार्यक्रमः प्रत्यङ्कस्य क्रियतेऽस्माभिः। पूर्वमपि राष्ट्रियान्ताराष्ट्रिय-अमेरिकास्थ-अटलाण्टा नगर्य्यादिषु सुरभारतीसमुपासकैः विशिष्टविदुषां सन्निधौ सञ्जातः। एतत्पराम्परायामस्याङ्कस्य लोकार्पणाय नवनालन्दामहाविहारस्य छात्रकल्याणसमितिसङ्घाध्यक्षैः श्रीमद्भिः आचार्य-विजयकुमारकर्णमहाभागैः विविधकार्यक्रमव्यस्ततायां सत्यामपि स्वकीया कृपानुमतिः प्रदत्ता। एतदर्थं तान् सहृदयान् सादरं सश्रद्धं सस्नेहं वावन्द्य परमां कृतज्ञतां च सन्दर्भेऽस्मिन् प्रकटयामि। पिष्टपेषणं भविष्यति पत्रिका संचालनकार्यं मणिमण्डितभुजङ्गस्य परिष्करणमिव दुर्लभं तथापि केषाञ्चन चतुरस्रवैदुष्यमण्डितानां महापण्डितानां विविधशास्त्रनिष्णातानामाचार्याणां राष्ट्रियान्ताराष्ट्रियस्तरे लब्धप्रतिष्ठानां महाविदुषां सहयोगमवाप्य द्वादशवर्षादधिककालात् सारस्वतरङ्गस्थले अनारतं नृत्यमाना जाह्नवी शोभतेतमाम्।

वस्तुतः पत्रिकेयं सर्वदा आक्षेपरहिता राजनीतिविमुखा संस्कृतप्रचारप्रसाराय च बद्धपरिकरा वर्त्तते। प्रस्तुताङ्कविषये किमपि कथनं नोचितं एतद् विषये कविकुलगुरोः कालिदासस्यैव पद्यं मत्कृते चरितार्थ्यम् "आपरितोषात् विदुषां न साधु मन्ये प्रयोग विज्ञानम्" इति।

अस्मिन् सारस्वतयज्ञे प्रत्यक्षतया परोक्षतया च ये साहाय्यमाचरितवन्तस्तेभ्यः समेभ्यः आचार्यप्रवरेभ्यः जाह्नवीपरिवारपक्षतः धन्यवादाः वितनोमि।

श्रुतिध्वनिमनोहरा मधुरसा शुभा पावनी
स्मृताप्यतनुतापहृत् समवगाहसौख्यप्रदा।
निषेव्यपदपङ्कजा विवुधवृन्दमान्याऽमला
समस्तजगतीतले प्रवहतादियं जाह्नवी

विदुषामनुचरः
झोपाख्यः सदानन्दः
जे.एन.बी. लगमास्थादर्श-
संस्कृतमहाविद्यालयस्थः



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

# प्रकाशकीयम्

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम्॥

प्राचीनकाले भारते ऋषयः बहुविघ्नतामध्येपि राष्ट्रसमुन्नत्यर्थं धर्माचरणं विधाय सन्मार्गं प्रादर्शयन्। तदवलम्बिनो भारतीयाः स्वाधीनतायाः पञ्चसप्ततितमसंवत्सराचरणावसरे अर्थात् अमृतमहोत्सवावसरे नानाविधविषमस्थितावपि स्वकर्त्तव्यपथि भूत्वा देशसमुन्नतये विविधमार्गान् निर्माय स्वीयं प्रातिभख्यापनं कुर्वन्तः सन्ति। साम्प्रतिके युगेऽपि भारते नैके युवानः विविधक्षेत्रेषु स्वकीयं वैदुष्यं ख्यापयन्तः विश्वस्मिन् शीर्षस्थपदममलङ्कुर्वन्ति इति महत् प्रमोदास्पदम्।

महदिदं उत्कर्षस्थानं यत् जाह्नवी-संस्कृत-ई-शोधपत्रिकाद्वारा छात्राणां पिपठिषूणामुपयोगाय नवचत्वारिंशाङ्कस्य लोकार्पणमत्र विधीयते। विश्वकल्याणाय राष्ट्रस्य समुन्नत्यर्थञ्च सारस्वतसाधनारता ये तपस्विनः सन्ति, तेषां मनोभावान् शोधपत्रमाध्यमेन अभिव्यनक्ती निजकर्त्तव्यपथि सर्वान् प्रेरयन्ती अनारतं प्रवहन्ती कलकलनिनादं कुर्वन्ती हसन्ती गीर्वाणवाणीं जपन्ती च जाह्नवी विश्वशान्तिनिमित्तं कालकूटविषपानं विधाय विश्वरक्षकान् पार्वतीजानीन् प्रार्थयते।

अन्ते सम्पादन-पुनर्वीक्षणकर्मसु ये प्रत्यक्षाप्रत्यक्ष-सहायकाः तेभ्यः साधुवादाश्च।

विद्वच्चरणचञ्चरीक**स्य**
झोपाख्य**स्य** बिपिनकुमार**स्य**।

Since 2010
ISSN- 0976-8645
UGC RN-41039

# काव्यप्रकाशस्य अप्रकाशितटीकानां विवरणम्

**अनसूया महारणा**[1]

**कुञ्चिशब्दाः**

अलङ्कारशास्त्रः, काव्यप्रकाशः, आचार्यमम्मटः, काव्यप्रकाशस्य अप्रकाशित टीका

**शोधसारः**

काव्यशास्त्रस्य ग्रन्थेषु स्वेतरसमस्तग्रन्थापेक्षया शिरोमणित्वं विभर्ति ग्रन्थोऽयं काव्यप्रकाशः । अलङ्कारशास्त्रेतिहासे काव्यप्रकाशः तथा तस्य रचयिता कश्मीरप्रदेशस्य मम्मटः विश्वविश्रुतः| मम्मटाचार्यस्य काव्यप्रकाशः काव्यशास्त्रजगति तरुणभास्करः एव भाति। स हि काव्यशास्त्रस्य सहस्राब्दार्जितानुभवं संगृह्णाति। काव्यप्रकाशस्य टीकानां सङ्ख्या भूयसी वर्त्तते। प्राचीनेकाले काव्यप्रकाशस्य टीकाकरणं वैदुष्यस्य मानदण्ड अवर्त्तत। एतस्मादेव हेतोः मौलिकग्रन्थकाराः अपि काव्यप्रकाशस्य प्रायः प्रसिद्धैः प्राचीनैः पण्डितैर्विशेषतो नैयायिकैः काव्यप्रकाशे टीका विरचयद्भिः वहु पराक्रान्तम्, तत्र हेतुः काव्यप्रकाशस्य पठनपाठनादौ विपुलप्रचारशालित्वं, बह्वर्थगर्भपरिमिताक्षरवत्वं, मान्यतमत्वं चेति मन्यामहे। ग्रन्थस्यास्य वहव्यः टीका सम्पादिताः प्रकाशिताः भवति चेत् अधुना मातृकालये वहुसङ्ख्यकाः अप्रकाशिता टीकाः अपि सन्ति। येषां विस्तृतविवरणं अस्मिन् शोधप्रपत्रे दातुं प्रत्यत्नं क्रियते तथा काव्यप्रकाशस्य अप्रकाशितटीका टीकाकर्तुः परिचयः, तेषां देशकालादि, अन्यकृतीनां सम्बन्धीनि सविशेषविवरणमपि प्रदीयते।

================================

अलङ्कृतिरलङ्कारः, सौन्दर्यमलङ्कारः। स च गुणादानदोषहानात्सम्पद्यते। तेनैतत्पर्यवस्यति यद्वाचां सौन्दर्याधायकतत्त्वग्रहणं तन्निरोधकतत्त्वापासनमेवालङ्कारस्तस्य शास्त्रं विवेचकविद्येति अलङ्कारशास्त्रम्। प्राचीनकाले काव्यसौन्दर्यशास्त्रम् अलङ्कारशास्त्रमिति कथ्यते। अतः प्राचीन काव्यलक्षणकाराः स्वग्रन्थान् अलङ्कारः नाम्ना इति विभुषयन्ति| परवर्तीकाले काव्यालङ्कारस्थाने केवलम् अलङ्कारशास्त्रस्य प्रयोगः दृश्यते| इदमेव साहित्यशास्त्रं, सौन्दर्यशास्त्रं काव्यलक्षणसाहित्यमपि व्यपदिश्यते। काव्यसाहित्यस्य स्वरूपावधारकत्वादिदं काव्यशास्त्रमपि व्यपदिश्यते। काव्यशास्त्रस्य सर्वोत्तमसाररूपतत्त्वानां सङ्कलनं कृत्वा काव्यप्रकाशे तेषां तत्त्वानां सम्यग् उपस्थापनं कृतम्। पूर्वाचार्याणां विषयप्रतिपादने याः न्यूनताः आसन् ताः विषयदृष्ट्या परिपूर्णाः भवेयुः तदर्थं प्रयत्नं कृतम् एवमेव साहित्यशास्त्रस्य रसध्वनिगुणदाषालङ्कारादि तत्त्वानां यथार्थं मूल्याङ्कनं कृत्वा काव्यप्रकाशे तेषां संस्थापनमपि कृतम्। सङ्क्षेपेण सूत्रशैल्या परिमितशब्दैः विशेषविषयाणां प्रतिपादनं मम्मटाचार्यै स्वीयकाव्यप्रकाशे क्रियते।

काव्यप्रकाशस्य अध्ययनम् अध्यापनं उद्भवकालादारभ्य अद्यावधि यथावत् रूपेण प्रचलितमस्ति| विविध शास्त्रक्लिष्टत्वाच्च ग्रन्थस्यास्य वहवः टीकाग्रन्थाः दृश्यन्ते| ग्रन्थस्यास्य शताधिकाष्टीकाग्रन्थाः सन्ति। कथ्यते हि प्रतिदशकं काव्यप्रकाशस्य नवीना टीका प्रणीयते इति।

[1] शोधछात्रा, संस्कृतविभागः, पण्डिच्चेरी विश्वविद्यालयः, ICSSR Doctoral Fellow, New Delhi.



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

अनेनाभाति यत् अयं ग्रन्थः काव्यशास्त्राध्ययनकर्तृणामतीव प्रियोस्ति। बह्वीसु भाषास्वपि काव्यप्रकाशस्यानुवादाः सन्ति कृताः। उक्तं च महेश्वरभट्टाचार्येण –

**“काव्यप्रकाशस्य कृता गृहे गृहे टीकास्तथाप्येष तथैव दुर्गमः सुखेन विज्ञातुमिमं य ईहते धीरः स एतां विपुलं विलोकताम्॥[2]“ इति।**

**काव्यप्रकाशस्य अप्रकाशितटीकानां विवरणम् -**

**1.तत्त्वपरीक्षा (सुबुद्धि मिश्रः) –**

काव्यप्रकाशस्य टीका ‘नरसिंहमनीषा’, ‘सारसमुच्चयः’, ‘विस्तारिका’, ‘सुधासागरः’, ‘जयरामकृत-तिलकटीका’ तथा ‘न्यायाचार्ययशो-विजयजी उपाध्यायस्य टीका’ इत्यादिषु सुबुद्धिमिश्रस्य नाम काव्यप्रकाशटीकाकाररूपेण उल्लिख्यते। औफ्रेक्ट्[3] सुबुद्धिमिश्रं ‘सुबुद्धिमिश्र-महेश्वर’ इति तस्य रिपोर्टमध्ये उक्तवान्। पीटर्सनवर्येण[4] अपि स्वरिपोर्टमध्ये अस्य उल्लेखनं कृतम् एवं तस्य टीकायाः नाम ‘तत्त्वपरीक्षा’, ‘शब्दार्थतत्त्वपरीक्षा’ वा इत्युक्तम्। एतत् आधारीकृत्य तस्य कालः त्रयोदश शताब्देः उत्तरार्द्धः इति मन्यते। आफ्रेक्टमहोदयेन तं वामनस्य काव्यालङ्कारसूत्रस्योपरि ‘साहित्यसर्वस्व’ इति टीकायाःरचनाकारः इति कथ्यते।

**2. टीका - अच्युतठक्कुरतर्काचार्यः –**

अयं आचार्यः तीरभुक्तेः अधिश्वरः महाराजाधिराज शिवसिंहस्य अमात्यप्रवरः रत्नपाणेः पिता आसीत्। अस्य कालः पञ्चदशशताब्देः पूर्वार्द्धः। एतत् सर्वं रत्नपाणिना विरचिते काव्यप्रकाशस्य टीकायां ज्ञातम्। एषा टीका अप्रकाशिता। झलकीकरेण रचित बालवोधिनीटीकायां अस्य उल्लेखनमस्ति।[5] तत्र मिथिलेशसचिवाच्युतभट्टाचार्याः इति उल्लिखितम्।

**3. टीका – वाचस्पति मिश्रः –**

अयं मैथिलीयब्रह्मणमध्ये सुप्रसिद्धः वाचस्पतिमिश्रः सदुपाध्यायः गिरिपतिमिश्रस्य पुत्रः, ‘‘स्वरोदय’’ ग्रन्थस्य व्याख्याकारः नरहरि मिश्रस्य पिता तथा ‘सङ्ख्यापरिमाण’ आदि ग्रन्थस्य प्रणेता म.म.केशवमिश्रस्य पितामहः आसीत्। अयं हि सर्वतन्त्रज्ञः। अस्य स्थितिकालः 1450-1550ख्री इति ‘तीरभुक्तेः इतिहासे’ उल्लिख्यते। अनेन युवावस्थायां मिथिलाधीश भैरवसिंहस्य सभा तथा च वार्धक्ये रामभद्रसिंहस्य सभायां प्रधानपण्डितपदमलङ्कृतम्। स्वजीवनकाले प्रायः एकचत्वारिंशत् ग्रन्थानां रचनाकृतवान्। काव्यप्रकाशस्य टीकाकाराः ‘चण्डीदासः’, ‘विश्वनाथः’, तथा ‘भीमसेनः’ स्व स्व टीकासु वाचस्पतिमिश्रस्य नामोल्लेखनं ‘सर्वशास्त्रविदोवाचस्पतिमिश्राः’ इति कृतवन्तः।

**4. काव्यदर्पणः – म.म. रत्नपाणि ठक्कुरः**

अयं हि मिथिलाधीशः शिवसिंहस्य अमात्यः अच्युतठक्कुरस्य पुत्रः एवं भवेशस्य पौत्रः इति तस्य टीकायां ज्ञातम्। तस्य अपरं नाम मनोधरः आसीत्। सोऽपि काव्यप्रकाशस्य मधुमतीटीकाकारः रविपाणेः

[2] झलकीकरटीका, प्रस्तावना – पृ. 20

[3] ABOD 208, IOC iii, 1130/566

[4] 2nd Report, p.17

[5] see Jhallakīkara inro 15, 32

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

पिता आसीत्।[6] काव्यप्रकाशटीकायां अनेन स्वपरिचयो दत्तः -

**"शिवसिंहान्मिथिलेशादवाप यो मन्त्रितां विदुषः।**
**तस्याच्युतस्य सूनुर्बभूव भुवि रत्नपाणिरयम्।।"[7]**

## 5. टीका- म.म.पक्षधरमिश्रः –

अयं मिथिलानिवासिनः शाण्डिल्यगोत्रिय-पण्डितमहादेवमिश्रस्य पुत्रः। पक्षधरमिश्रस्य वास्तविकनाम जयदेवमिश्रः इति आसीत्। शास्त्रविचारविमर्शनं काले कस्मिन् एकोऽपि दुर्बलपक्षस्य आश्रयनीत्वा अपि स्वबुद्धिवैभवेन तस्य सम्यक् समर्थनकारणात् सः पक्षधरः इति नाम्ना प्रसिद्धः जातः। आचार्यझलकीकरमहाभागानां टीकायां अयं महान् नैयायिकः इति उल्लेखमस्ति। सोऽपि जयदेवनाम्ना पीयूषवर्षनाम्ना च प्रसिद्धश्चन्द्रालोकाख्यालङ्कारग्रन्थकर्ता चेति बोध्यम्। शिरोमणिग्रन्थस्योपरि तेन टीका विरचितमिति लिखितम्।[8] स्व पितृव्य म.म. हरिमिश्रस्य समीपे सकलशास्त्राध्यायनं कृत्वा गङ्गेशोपाध्यायस्य 'न्यायचिन्तामणेः' उपरि 'आलोकः', वर्धमानउपाध्यायस्य 'द्रव्यकिरणावलेः' उपरि 'प्रकाश' नाम टीका, तथा च 'न्यायपदार्थमाला', 'प्रसन्नराघवः' (नाटक), 'चन्द्रालोकः' इत्यादि द्वाविंशति ग्रन्थानां रचनां कृतवान्।

## 6. पद्मनाभ मिश्रः –

अयं हि महाकवि विद्यापतेः समकालिकः, मैथिल दीर्घघोष (दिघवर) वंशीयः, 'वाणीभूषणम्' इति छन्दशास्त्रस्य निर्माता, मिथिलाधीशगणेश्वरसिंहस्य पुत्रः कीर्त्तिसिंहस्य सभापण्डितस्तथा च दामोदरमिश्रस्य पुत्रः आसीत्। अनेन 'सुपद्मव्याकरणम्' इति ग्रन्थस्य निर्माणं कृतम्। कमलाकारभट्टः स्वटीकायां पद्मनाभमिश्रस्य टीकायाः उल्लेखं कृतवान्।[9] अस्य कालः प्रायशः चतुर्दशशताब्दी इति मन्यते।

## 7. टीका – रत्नेश्वरमिश्रः –

काव्यप्रकाशस्य अस्याः टीकायाः रचयिता भोजस्य सरस्वतीकण्ठाभरणस्योपरि 'रत्नदर्पण'नामटीकायाः कर्ता प्रसिद्ध रत्नेश्वरमिश्रः इति।[10] अयं रामसिंहदेवं आश्रितस्तथा तेनैव निर्मित्त 'कण्ठाभरणस्योपरि' टीका विरचितम्। सरस्वतीकण्ठाभरणस्य तृतीयपरिच्छेदस्य अन्तिमेपद्ये उक्तम् –

**"श्रीरामसिंहदेवाज्ञामादाय रचितो मया। दर्पणाख्यः सदा तेन तुष्यतां श्रीसरस्वती।।**
**रत्नेश्वरो नाम कवीश्वरोऽसौ, विराजते काव्यसुधाभिषेकैः।**
**दुस्तर्क वक्राहतदुर्विदग्धां वसुन्धरां पल्लवयन्नजस्त्रम्।**
**अद्य स्फुरतु वाग्देव्याः कण्ठाभरणकौतुकम्। मयि ब्रह्ममनोवृत्तौ कुर्वाणे रत्नदर्पणम्।।[11]"**

रत्नदर्पणटीकायां टीकाकारेण स्वप्रणीतं काव्यप्रकाशस्य

[6] Ncc, Vol.4, Pg. 98
[7] काव्यप्रकाशटीका यशोविजयजी महाराज, पृ -73
[8] See, Jhallakīkara intro, pg. 15
[9] NCC – Vol 4, pg. – 97, Jhallakīkara's Intro to his commentary on Kav.pr. 1921, pg. 14,30,31
[10] Ncc, Vol.4, Pg. 99
[11] Kamesvaranath Mishra - comm. On Bhoja's Sarasvati, edn. 1976 – Preface – pg. 18



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

इयं अनामटीकायाः उल्लेखः प्राप्यते।

## 8. टीका – पुण्डरीक विद्यासागरः –

अयं वङ्गदेशस्य निवासी पुण्डरीकविद्यासागरस्योल्लेखः श्रीवत्सलाञ्छनस्य 'सारबोधिनी' टीकायां प्राप्यते। अतः तस्य कालः पञ्चदशशताब्देः पूर्वं इति मतम्। डा. दे मतानुसारं विद्यासागर तस्य उपाधिः एवञ्च विद्यासागरनाम्ना कश्चित् लेखकः भट्टस्योपरि 'कलादीपिका' नामक टीकां रचितवान्। रामनाथः तस्य अमरकोशस्य टीकायां विद्यासागरं उल्लिखति। पण्डित शिवप्रसादभट्टाचार्यः[12] विद्यासागरः मम्मटस्य टीकाकारः एवञ्च सोऽपि वामनस्तथादण्डीनां च उपरि टीकाविरचितवान् इत्युक्तम्।

## 9. टीका – यशोधरोपाध्यायः –

म.म. नरसिंहठक्कुरस्य 'नरसिंहमनीषायां' अस्य नामोल्लेखः प्राप्यते।[13] न्यायाचार्यः यशोविजयजी उपाध्यायः अपि स्वकाव्यप्रकाशटीकायां यशोधरोपाध्यायं उल्लिखति। स्वयं यशोधरः स्व 'कामसूत्र-व्याख्यायां' भदन्त रविदत्तस्योल्लेखं चकार अतः अस्य कालः पञ्चदशशताब्दी इति मन्यते।अस्मिन् टीकायाः उल्लेखः झलकीकरटीकायां प्राप्यते।[14]

## 10. उदाहरणदीपिका – म.म. गोविन्दठक्कुरः –

गोविन्दठक्कुरस्य इयं द्वितीया टीका वर्त्तते। अत्र मूलग्रन्थपाठान्तर्गत उदाहरणपद्यानां विशदव्याख्यानं कृतम्। डा. सुशिल कुमार दे महोदयस्य मतानुसारं स्टीन्[15] यत् 'श्लोकदीपिकायाः' उल्लेखं स्वरिपोर्टमध्ये कृतं तदेव उदाहरणदीपिका इति। वैद्यनाथतत्सत् स्वटीकायां दीपिकाकारः शब्दस्य प्रयोगः जयन्तभट्टस्य दीपिका कृते न अपि तु गोविन्दठक्कुरस्य 'उदाहरणदीपिकायाः' कृतम्। कारणं उदाहरणचन्द्रिकायां दीपिकाकृत् इति यत् मत्स्य उपपादनं क्रियते तत् जयन्तभट्टकृतदीपिकायां न प्राप्यते। भीमसेनस्तथा नागोजीभट्टस्य काव्यप्रकाशटीकायां अस्य उद्धृतमस्ति।[16] तेन विरचितेन काव्यप्रकाशटीका प्रदीपमध्य अस्यां टीकायामुल्लेखः प्राप्यते।

**दीपिकाद्वितयं कन्ये प्रदीपद्वितीयं सुतौ।**
**स्वमतौ सम्यगुत्पाद्य गोविन्दः शर्म विन्दति।[17]**

## 11. टीका – मुरारी मिश्रः -

अयं हि शाण्डिल्यगोत्रियः मैथिलः श्रीकृष्णमिश्रस्य पुत्रस्तथा केशवमिश्रः रामभद्रस्य च अन्तेवासी एवञ्च मोरङ्गस्य नृपतिः त्रिविक्रमनारायणः तस्य आश्रयदाता आसीत्। भीमसेनस्य सुधासागरे उद्धृतम्[18]। अनेन काव्यप्रकाशटीकां व्यतिरिच्य 'शुभकर्मनिर्णयादि' विविधाः ग्रन्थाः विरचिताः। शुभकर्मनिर्णये स्वपरिचयं प्रददाति –

**"विज्ञायाखिलशास्त्रममलं श्रीरामभद्राद् गुरोर्मिश्रात्**

[12] श्रीधरकृत काव्यप्रकाशटीका भूमिका पृ.30
[13] Ncc, Vol – 4, Pg. 99
[14] see Jhallakīkara, Intro of Kav.pr. 1921 edn. Pg. 15.
[15] Pg. 28, 60, 269
[16] Ncc, Vol. 4, Pg.103
[17] काव्यप्रदीपटीका - पृ 601
[18] NCC, Vol. 4, Pg. 99, Jhallakīkara comm. – pg. 33

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

**केशवतः स्मृतीरथ तयोः सारं विविच्य स्वयम्।**
**पादाम्भोजयुगं प्रणम्य शिवयोः सद्भावतां प्रीतये,**
**व्यातेने 'शुभकर्मनिर्णय'ममुं श्रीमान् मुरारिः कृतौ।।**[19]".

## 12. काव्यप्रकाशभावार्थः - रामकृष्णभट्टः

महाराष्ट्रनिवासी विश्वामित्रगोत्रोत्पन्नः रामकृष्णभट्टः 'नारायणभट्टी' आदेः ग्रन्थस्य प्रणेतुः नारायणभट्टस्य पुत्रः एवं 'भाट्टवार्त्तिकः', 'निर्णयसिन्धुः' तथा 'काव्यप्रकाशव्याख्याकर्तृः' कमलाकरभट्टस्य पिता आसीत्। तस्य परिचयसम्बन्धी तथ्यः कमलाकरी टीकायां प्राप्यते –

**"नारायणात्मजः श्रीमद्रामकृष्णात्मजः कृती।**
**काव्यप्रकाशगां व्याख्यां तनोति कमलाकरः।।**"[20]

अस्य समयः1550 इति मतम्। प्रस्तुतटीकायाः अपरं नाम 'कविनन्दिनी' अथवा 'नन्दिनी' इति कथनं अस्ति। औफ्रेक्ट[21] रिपोर्टमध्ये अस्य उल्लेखः प्राप्यते।

## 13. कविनन्दिका - रामकृष्णः

अस्याः टीकायाः अपरं नाम "नन्दिनी" भावार्थः वा ।[22] काव्यप्रकाशस्य भावार्थः अस्यां टीकायां प्राप्यते। टीकायाः रचनाकालः 1601 वर्षः इति मन्यते अतः टीकाकर्तु समयः 1553-1650वर्ष मध्ये इति वक्तुं शक्यते।

## 14. काव्यकौमुदी – म.म. देवनाथठक्कुरतर्कपञ्चाननः

म.म. गोविन्दठक्कुरस्य[23] अष्टपुत्राणां मध्ये अन्यतमः देवनाथः "अधिकरणकौमुदी", "स्मृतिकौमुदी", "तन्त्रकौमुदेः" ग्रन्थस्य रचयिता आसीत्। प्रस्तुत 'काव्यकौमुदेः' रचनायाः उद्देश्यं तस्य पितुः प्रणीतं काव्यप्रदीपसम्बन्धीनः आक्षेपाणां निवारणम्। अस्याः टीकायाः उल्लेखः कमलाकारभट्टः भीमसेनश्च कृतवन्तौ।[24] शास्त्रार्थविचारस्य प्रगल्भता कारणात् 'तर्कपञ्चानन' इति पदवीना मण्डितः स्यात्। तस्य स्थितिकालः षोडशशताब्देः अन्तिमपर्यायः इति मतम्।

## 15. सुधानिधि टीका – तिरुवेङ्कटः

अयं दाक्षिणात्य चिन्तितिम्मसस्य पुत्रस्तथा तालपाकस्य (अनन्ताचार्यः) पौत्रः आसीत्। अनेन रचितेन काव्यप्रकाशटीकायां भट्टगोपालस्य नामोल्लेखः प्राप्यते[25], अतः तस्य कालः षोडशशताब्दी निर्णेतुं शक्यते। मद्रास केटलाग, A 318 मध्ये अस्य उल्लेखः अस्ति।

## 16. रहस्यप्रकाशः – रामनाथ उपाध्यायः

अयं नेपालराज्यान्तर्गतः मोरङ्गदेशस्य अधिपतिः कंसनारायणस्य सभापण्डितः आसीत्। म.म. लोचनकवेः रागतरङ्गिणीमध्ये रामनाथ उपाध्यायस्य रचित गीतं उदाहृतम्। तस्मात् तस्य स्थितिकालः

---

[19] 79
[20] आचार्यबाबुलाल् शुक्लः, काव्यप्रकाशः टीका कमलाकरी – पृ 1
[21] 1, 102. 2,20A, 2. 169B
[22] NCC, Vol 4 – Pg. 99
[23] NCC – Pg. 97
[24] NCC – Pg. 97
[25] Ncc, vol.4, pg. 96



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

षोडशशताब्दीः इति मन्यते।[26] डा. सुशिल कुमार दे[27] अयं वङ्गीयटीकाकारः रामनाथ विद्यावाचस्पतिः इति उक्तम्। आफ्रेक्टमहोदयेनामपि[28] तस्योल्लेखः स्वरिपोर्टमध्ये कृतवान्। भवदेवस्य 'संस्कारपद्धति' ग्रन्थस्योपरि अयं टीकां विरचितवान्।[29]

## 17. टीका – रुचिकर मिश्रः

नरसिंहमनीषायां रुचिकरमिश्रस्य नामोल्लेखनं दृश्यते। अयं म.म. गोविन्दठक्कुरस्य अग्रजात् भिन्नः।[30] तस्य विषये न कोऽपि तथ्यं उपलभ्यते।

## 18. टीका – गदाधरचक्रवर्ती भट्टाचार्यः[31]

वङ्गप्रदेशस्य पवनमण्डलान्तर्गतः 'पक्ष्मीपाशः' नाम ग्रामे जातं गदाधरचक्रवर्त्तिः जीवाचार्यस्य पुत्रः आसीत्। नवद्वीपस्य गुरुहरिरामतर्कवागीशात् समग्रन्यायशास्त्रं अधीतम्। अस्य जन्मकालः षोडशशताब्देः अन्तिमभागः इति मन्यते। रघुनाथशिरोमणीना कृत 'तत्वचिन्तामणि-दीधिति' ग्रन्थस्योपरि अनेन टीका विरचिता। न्यायशास्त्रस्य प्रसिद्धटीकाग्रन्थनिर्मातृ रूपेण विख्यातः अस्य काव्यप्रकाशस्य इयं टीका न अति प्रसिद्धं जातम्।

## 19. टीका – म.म. पण्डितराजः

अयं धर्मशास्त्रज्ञः महेशठक्कुरस्य शिष्यः "रघुनन्दनरायः" न तु पण्डितराज जगन्नाथः[32]। रत्नकण्ठस्य 'सार-समुच्चयः' इति टीकायां अस्याः टीकायाः उल्लेखनं प्राप्यते। म.म. डा. गङ्गानाथ झा महोदयेन काव्यप्रकाशस्य अङ्ग्रेजी अनुवादस्य भूमिकायां अस्याः टीकायाः पाण्डुलिपेः(1637ख्री.) आद्यन्तथा अन्तभागस्य उल्लेखनं कृतवान्। स्टीन् महोदयेनापि पाण्डुलिपि 1164 पृ. 60, 266 मध्ये अस्याः वर्णननं कृतम् (औफ्रेक्ट् I 19 A)। 'मिथिला महाराज संस्कृत पुस्तकालये' विद्यमाना इयं टीकायाः कालः सप्तदशशताब्देः पूर्वं इति मतम्।

## 20. काव्यालङ्काररहस्यनिबन्धः/ साहित्यदीपिका – भास्करः

श्रीवत्सलाञ्छन, गोविन्दः, रविपाणि, नरसिंहठाकुरः, भीमसेनः एवं रत्नकण्ठेन उद्धृतम्। नरसिंहमनीषायां "लाटभास्कर मिश्रः" इति नाम्ना अस्य उल्लेखः दृश्यते।[33] अतः तस्य समयः सप्तदशशताब्दी इति मन्यते।

## 21. सारदीपिका – गुणरत्न गणिः

अयं हि खरतरगच्छस्य जिनमाणिक्यसूरेः प्रशिष्यस्तथा विनयसमुद्रगणेः शिष्यः आसीत्। अनेन स्वशिष्यस्य रत्नविशालस्याध्ययनार्थं प्रायशः 10,000 श्लोकप्रमाणरूपं नीत्वा इयं टीका विरच्यते। भण्डारकर ओरियण्टल इन्स्टीच्युट् मध्ये हस्तलेख सूची 12, पृ. 112 मध्ये अस्य निर्देशः अस्ति। अस्य रचनाकालः 1742ख्री.।

---

[26] श्री वद्रिनाथ झा – गोकुलनाथीविवरण भूमिका, पृ- 9 ।
[27] संस्कृत काव्यशास्त्र का इतिहास भाग 1, पृ 161 ।
[28] 102A
[29] Aufrecht i, 516 A
[30] कविशेखर श्री वद्रिनाथ झा – विवरणस्य भूमिका, पृ- 11
[31] Ncc, Vol. 4, Pg. 93
[32] S.K. de – pg. 178
[33] Ncc, Vol.4, pg. 98

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

### 22. नरसिंहमनीषा – म.म. नरसिंह ठक्कुरः

अयं रविठक्कुरस्य वंशज गदाधरठक्कुरस्य पुत्रः आसीत्। सोऽपि होसिंहकृष्णस्य गुरुः आसीत्।[34] नरसिंहठक्कुरकृतायां नरसिंहमनीषाख्यटीकायां तु ‘चण्डीदासः’, ‘लाटभास्कर मिश्रः’, ‘सुबुद्धि मिश्रः’, ‘मधुमतीकारः’, ‘कौमुदीकारः’, ‘आलोककारः’, ‘यशोधरोपाध्यायः’, ‘मणिसारः’, ‘रुचिकरमिश्रः’, ‘परमानन्दचक्रवर्त्तीः’ एवञ्च ‘प्रदीपकारः’ इत्यादीनि काव्यप्रकाशटीकाकाराणां नामान्युपलभ्यन्ते। “ताराभक्ति-सुधार्णव” नाम तन्त्रग्रन्थस्य प्रणेता अयं न्यायशास्त्रस्य प्रकाण्डपण्डितः आसीत्। अयं असाधारणनैयायिकः अत एव सुधासागरे भीमसेनेनोक्तं न्यायविद्यावागीशनरसिंहठक्कुराः इति। नरसिंहमनीषा केवलं सप्तमोल्लासस्य पददोषपर्यन्तं प्राप्यते।

### 23. मणिसारः – अज्ञातनामा

अस्याः उल्लेखनं नरसिंहमनीषायां प्राप्यते।[35]

### 24. दीपिका – शिवनारायणदास ‘सरस्वतीकण्ठाभरण’

“सरस्वतीकण्ठाभरण” इति उपाधिना सम्मानितः अयं दुर्गादासस्य पुत्रः आसीत्।[36] बेबर तस्य सूची भाग 1, सं. 819 तथा औफ्रेक्ट भाग 1, सं. 102 मध्ये तस्य उल्लेखनं विद्यते। तेन विरचितेन ग्रन्थाणां विषये औफ्रेक्ट् I, 649 B मध्ये वर्णनं दृश्यते।

### 25. रहस्यप्रकाशः – जगदीश भट्टाचार्यः

अयं भवानन्द तर्कवागीशस्य समीपे न्यायशास्त्रस्याध्ययनं कृतवान्।[37] नवद्वीपस्य निवासी एवं गदाधरभट्टस्य सहपाठी आसीत्। अयं “शब्दशक्तिप्रकाशिका”, “न्यायचिन्तामणि दीधिति व्याख्या”, दीधित्युपरि “जागदीशी टीका” अपि विरचितवान्। तस्य ‘तर्कालङ्कारः’ इति नाम्ना सम्बोधनं क्रियते। औफ्रेक्ट् भाग 1, 101 ( मित्रा 1651) मध्ये अस्य उल्लेखनं कृतम्। अस्य काव्यप्रकाशस्य पाण्डुलिपिः तस्य शिष्येण शक- 1579-1657ख्री. कृतवान्।

### 26. सारसमुच्चयः – राजानक रत्नकण्ठः

कश्मीरप्रदेशस्य धौम्यायनगोत्रोत्पन्नः शङ्करकण्ठस्य[38] पुत्रस्तथा अनन्तकवेः पौत्रः रत्नकण्ठेन काव्यप्रकाशस्य सारसमुच्चयः नाम टीकाग्रन्थः प्रणीतः। अस्यां टीकायां पूर्ववर्त्ती प्रसिद्धटीकाकाराणां नामानि प्राप्यन्ते[39] यथा – ‘भास्करस्य साहित्यदीपिका’, ‘श्रीवत्सस्य सारबोधिनी’, ‘सुबुद्धिमिश्रः’, ‘पण्डितराजः’, ‘परमानन्दस्य विस्तारिका’ एवं ‘गोविन्दस्य प्रदीपः’। स्टीन्[40] महोदयस्य मतानुसारं अयं “राजतरङ्गिणी ग्रन्थस्य मूलपाण्डुलिपिः”, “रुय्यककृत सङ्केतस्य पाण्डुलिपि”, 1655वर्षे अमरस्योपरि “रायमुकुटस्य टीका”, 1673तमे वर्षे

34 NCC, Vol 4, pg. - 97
35 Ncc, Vol.4, Pg.93
36 Ncc, vol. 4, pg. 101
37 Ncc, vol. 4, pg. 96
38 NCC, Vol. 4 – Pg- 99
39 Peterson report 2, Pg -17
40 Stein, Preface .7



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

“त्रिलोचनदासस्य कातन्त्रचन्द्रिकायाः” अपि अनुलिपि अनेन निर्मितम्। अयं हि 1672 ख्री. “युधिष्ठिरविजयकाव्यस्य टीका”[41] तथा च “स्तुतिकुसुमाञ्जलि-टीका” (शिष्यहिता)याः रचना 1681तमे वर्षे कृतम्। अतः तस्य साहित्यरचनाकालः 1648-1681 इति मतम्। अस्य उद्धरणं पीर्टसन् रिपोर्ट ii, p-129, ii- 16 मध्ये प्राप्तम्।

### 27. लीला – भवदेवः

मिथिलानिवासिनः कृष्णदेवस्य पुत्रस्तथा भवदेवठक्कुरस्य शिष्यः।[42] भवदेवः वेदान्तसूत्रस्योपरि[43] टीका विरचिता। अस्याः टीकायाः अन्तिमपद्ये अस्य कालः मोगल् सम्राट् शाहाजहान् शासनकाले आसीत् इति उल्लिखितम्। एवञ्च काव्यप्रकाशस्य रचना शकाब्द 1571-1649 ख्री. पटना मध्ये जातम् इति सूचितम्। अस्य कालः सप्तदशशताब्दी इति Ncc मध्ये उल्लिखितमस्ति।

### 28. टीका – विजयानन्दः

अस्याः पाण्डुलिपि डेक्कनकालेज पूना कैटलाग मध्ये पृ. 44 अनुसारं प्राप्यते। पाण्डुलिपेः समयः 1683ख्री. इति सूचितम्।

### 29. सुमनोमनोहरा – गोपीनाथः[44]

अनेन साहित्यदर्पणस्य प्रभाटीका तथा रघुवंशस्य टीका विरचितम्। “श्री गोपिनाथ कविराज” नाम्ना अस्य प्रसिद्धिः आसीत्। रघुवंशस्य टीका अनेन 1677तम वर्षे निर्मितम्, तस्य आधारेण अस्य कालः षोडशशताब्दी इति मन्यते। औफ्रेक्ट् भाग 1, पृ.101, 162 बी. मद्रास Trm c. 712 मध्ये अस्य उल्लेखनं दृश्यते।

### 30. टीका – नारायण दीक्षितः

अयं रङ्गनाथदीक्षितस्य पुत्रस्तथा बालकृष्णदीक्षितस्य भ्राता आसीत्। रङ्गनाथेन विक्रमोर्वशीयम् उपरि टीका ख्रीष्टाब्द 1656 मध्ये निर्मितम्। अतः नारायणदीक्षितस्य समयः सप्तदश शताब्दी इति वक्तुं शक्नुमः। [45]

### 31. लघु उद्योतः – नागेशभट्टः

अयं हि नागोजीभट्टः शिवभट्टसुतः, सतीगर्भजः, आश्वालयनशाखाध्यायी उपाध्यायोपनामकः काले इत्युपनामकश्च वारणसीवास्तव्यः महाराष्ट्रब्राह्मणः, महावैयाकरणः, वैयाकरणसिद्धान्तकौमुदीकृत् भट्टोजीदीक्षितपौत्रस्य हरिदीक्षितस्य शिष्यः। अयं हि नागोजीभट्टः पण्डितेषु अग्रगण्यः अत एव अनेन बहवो ग्रन्था विरचिताः। नागेशभट्टेन विरचितं बृहत् उद्योत प्रतीकायां वर्णितं कस्यचित् विषयस्य संक्षिप्तीकरणं अथवा भिन्नतात्पर्यं व्यक्तं कृत्वा अस्याः रचनां कृतवान्। व्याकरणग्रन्थे यथावत् बृहत् तथा लघुनाम्ना एक ग्रन्थस्य भिन्नद्वयेन रचितम् तथैव अत्र तस्य अनुकरणं दृश्यते। आचार्यझलकीकरेण उक्तं – लघूद्योतापेक्षया बृहदुद्योते कचित्कचित् किञ्चिदेवाधिक्यम्, यथा लघुशब्देन्दुशेखरापेक्षया बृहच्छब्देन्दुशेखरं तद्वदिति

41 Aufrecht I, 489 B
42 Ncc, vol 4, pg. 98
43 Aufrecht ii, 20, Madras Catalogue 12824-25
44 Ncc, vol. 4, pg. 95
45 Aufrecht part 1, 101 B. (202 A. Pg.155)

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

ज्ञेयम् ।[46]

### 32. उदाहरण दीपिका अथवा प्रदीप – नागेशभट्टः

नागेशभट्टकृतः इयं काव्यप्रकाशस्य अन्या एका स्वतन्त्रटीका । अस्याः उल्लेखः स्टीन् महोदयः तस्य रिपोर्ट पृ. 59, 268[47] एवं औफ्रेक्ट भाग 2 पृ 19 वि. मध्ये कृतवन्तौ। काव्यप्रकाशटीका उद्योतस्य सारांसिका वर्त्तते।

### 33. साहित्यकौमुदी – बलदेव विद्याभूषणः

वैष्णवचैतन्यसम्प्रदायानुयायी अयं उत्कलीयः राधादामोदरदासः गोपालदासस्य च शिष्यः एवञ्च उद्धवदासस्य गुरुः आसीत्। मध्वस्तथा चैतन्यमतानुयायीनां मध्ये सम्बन्धस्थापनार्थं अनेन वहुप्रयत्नं कृतः। काव्यप्रकाशस्य कारिकां अयं अपि भरतसूत्रः इति कथितं[48] अतः स्वटीकायाः नाम भरतसूत्रवृत्तिः 'साहित्यकौमुदी' इति नाम्ना उल्लिख्यते। अनेन वेदान्तसूत्रस्योपरि 'गोविन्दभाष्यः' तथा 'प्रमेयरत्नावली' विरचितम्। औफ्रेक्ट् अनुसारं 'उत्कलिकावल्लरी' उपरि अस्य एका टीका 1765 मध्ये लिखितम्।

### 34. उदाहरणचन्द्रिका - वैद्यनाथ तत्सत्[49]

वैद्यनाथकृतायामुदाहरणचन्द्रिकायां तु 'चण्डीदासः', 'सुबुद्धिमिश्रः', 'जयन्तभट्टकृतदीपिका', 'महेशः' इत्यादीनि नामान्युपलभ्यन्ते। अनेन हि वैद्यनाथेन 'काव्यप्रदीपटीका प्रभा', 'कुवलयानन्दटीका चन्द्रिका' च रचिता। अयं हि वैद्यनाथः प्रतापरुद्रयशोभूषणकृद्विधानाथादर्वाचीन एव। अत एव अनेन वैद्यनाथेन स्वकृतकुवलयानन्दचन्द्रिकायां सङ्करालङ्कारे तदुक्तं वैद्यनाथेन इत्युक्त्वा तत्कृतप्रतापरुद्रग्रन्थोऽप्यनूदित इति दिक्।

### 35. बालवोधिनी विद्यासागरी – छज्जुराम शास्त्री विद्यासागरः

न्यायादिदर्शन-व्याकरण-साहित्यनिष्णातोऽयं म.म. पण्डित छज्जुरामजी शास्त्री विद्यासागरस्य अस्याः टीकायाः मङ्गलाचरणे तैः उक्तम् –

**"प्रणिपत्य गणाधीशं मातरं पितरं तथा।**
**उद्भट काव्यसाहित्ये मम्मटं च वुधोत्तमम्।।**
**कुरुक्षेत्रप्रजनिना, इन्द्रप्रस्थनिवासिना।**
**महामहोपाध्यायेन छज्जुरामेण शास्त्रिण।।**
**वामनाचार्य-टीकातः सारमाकृष्य यत्नतः।**
**काव्यप्रकाशस्य निधेः कुञ्जिकेय विधीयते।।**[50]"

प्रथमोल्लासस्य अन्ते –

**"इति महामहोपाध्यायछज्जुरामशास्त्रीविद्यासागरेण कृतायां काव्यप्रकाशटीकायां परीक्षाव्याख्यायां काव्यस्वरूपनिर्णयो नाम प्रथम उल्लासः।"**

अतः एतत् ज्ञायते शास्त्रीणा एषा टीका झलकीकरेन विरचितं टीकायाः सारांशमेव। अस्याः 'कुञ्जिका', 'परीक्षा' वा अपरोनाम। उपलब्धांशस्य निरीक्षणेन एतत् ज्ञातं इयं टीका परीक्षार्थीनां कृते निर्मितम्। अस्याः टीकायाः केवलं प्रथमोल्लासः एव

[46] See Jhallakīkara's Intro, pg.16
[47] Ncc, vol.4, pg. 103.
[48] Ncc, vol 4. Pg. 102
[49] Ncc, vol.4, pg. 101
[50] 98



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

सम्प्रति प्राप्यते।

### 35. विषमपदी – शिवराम त्रिपाठी

अयं शिवरामत्रिपाठी कृष्णरामस्य पुत्रः, त्रिलोकचन्द्रस्य पौत्रस्तथा गोविन्दरामः, मुकुन्दरामः,केशवरामश्च तस्य भ्रातरः आसीत्। काव्यलक्ष्मी अपरोनाम ।[51] स्टीन् महोदयस्य रिपोर्ट (पृ-292) अनुसारं तस्य विरचितः 'रावणपुरवध' ग्रन्थस्य अन्ते स्वग्रन्थानां उल्लेखनं प्राप्यते। अनेन रचितेन 'रसरत्नहारः टीका' 'लक्ष्मीविहार टीकया' सह काव्यमाला गुच्छके[52] प्रकाशितम्। 'अलङ्कार-समुद्गकः', 'वासवदत्ता' उपरि टीका, 'काव्यलक्ष्मीप्रकाशः' (छन्दशास्त्रविषयकग्रन्थः), 'विहारः', एवञ्च सिद्धान्तकौमुदेः उपर्यपि 'विद्याविलासटीका' सः रचितवान्। अस्य कालः अष्टादशशताब्देः प्रारम्भ इति वक्तुं शक्नुमः। फिट्ज एडवर्ड हाल, बिब्लियोथिका इण्डिका संस्करण 1859 मध्ये तं 'वासवदत्तायाः' टीकाकारः तथा 'विषमपदीटीकायाः' रचयिता इति उल्लिखितम्। जर्नल आफ दि अमेरिकान् सोसाइटी 24, 57-63 मध्ये अस्य सम्बन्धीनः तथ्यः उपलभ्यते। औफ्रेक्ट् i 652 B , तथा स्टीन् जम्मु कैटलाग पृ. 262 मध्ये अपि अस्य उल्लेखनं दृश्यते। काव्यप्रकाशस्य क्लिष्टपदानां स्पष्टीकरणार्थं अस्याः रचना क्रियते।

### उपसंहारः –

काव्यस्वरूपनिर्माणे तद्दोषगुणालङ्कारादीनामवधारणे च अलङ्कारशास्त्रनाम्ना काव्यशास्त्रे प्रयतते| सत्स्वपि वहुष्वलङ्कारशास्त्रेषु श्रीमदाचार्यस्य मम्मटस्य काव्यप्रकाशः सर्वान् अलङ्कारग्रन्थान् अतिशेते| अयं काव्यप्रकाशः काव्यशास्त्रग्रन्थेषु एकतमो निबन्धः। काव्यप्रकाशे प्रायः प्राचीनकविकृतान्येव पद्यानि उदाहरणत्वेन उपन्यस्तानि। अयं हि मम्मटोऽनुपमः पण्डितः अत एव अनेन प्रणीतोऽयं काव्यप्रकाशग्रन्थः आकरइति व्यवह्रियते टीकाकारैः। वैयाकरणसिद्धान्तमञ्जुषादौ इत्यादिना ग्रन्थेन 'तदुक्तं काव्यप्रकाशे' इति काव्यप्रकाशमतं स्वकल्पितेऽर्थे प्रमाणत्वेनोपन्यस्तवन्तो नागोजीभट्टादयः। न केवलं साहित्यिकाः अपितु दार्शनिकाः, वैयाकरणाः, वेदान्तिनः अपि काव्यप्रकाशस्य टीकाकाररूपेण स्वपाण्डित्यं प्रदर्शितम्। यद्यपि काव्यप्रकाशस्य वहवः टीकाग्रन्थाः सम्पादिताः प्रकाशिताश्च सन्ति अस्य ग्रन्थस्य अनेके टीकाग्रन्थाः अद्यावधि मातृकारूपेण विद्यते।तेषु अप्रकाशितेषु टीकाग्रन्थषु उपरोक्त आलोचिताः टीकाग्रन्थाः अन्यतमाः। अस्मिन् शोधप्रपत्रे तेषां विवरणं तथा टीकाकाराणा विषये अपि विस्तृतविवरणं प्रदात्तुं यत्नं क्रियते मया। उपरोक्तसर्वानां टीकानां सम्पादनं अध्ययनपूर्वक प्रकाशनेन विद्वांसः पाठकाः शोधकर्त्तारश्च लाभान्विता भवेयुः इति शोधप्रबन्धनिर्माणरूप प्रयत्नः मया विधीयते।

### 'सन्दर्भग्रन्थसूची

- आचार्य डा. जगदीशचन्द्रमिश्रः ,संस्कृतकाव्यशास्त्रेतिहासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2002।
- काव्यप्रकाशः – संपा. रघुनाथ दामोदर कर्माकर टीका, बालवोधिनी झलकीकरोपनाम्ना

[51] Ncc, vol. 4, pg. 101
[52] 1870 – pg. 118-140

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

रामभट्टात्मज भट्टवामनाचार्यः, भण्डारकर इन्स्टिच्युट् प्रेस्, पुना- 4, 1933।

- काव्यप्रकाशः - संपा. नारयण शास्त्री खिस्ते एवं मुकुन्द शास्त्री खिस्ते, टीका सुधासागरः, (1-7 उल्लासः) , चौखम्बासंस्कृतसीरीज आफिस, विद्याविलास प्रेस, वारणासी – 1927।
- काव्यप्रकाशः – डा. गोपराजु रामा एवं डा. जगन्नाथपाठकः,बालचित्तानुरञ्जनी-सारबोधिनी-दर्पणाख्यटीकात्रयसम्वलितः, गङ्गानाथझाकेन्द्रीय संस्कृतविद्यापीठम्, प्रयागः, 1976।
- Theodor Aufrecht, Catalogues Catalogorum, Leipzig – 1891.
- S. Kuppuswami Sastri, Prof. P.P Subhramanya Sastri, C. Kunhan raja - New Catalogues Catalogorum, University of Madras, 1937.
- P.V. Kane, History of Sanskrit poetics, Motilal Banarasi Das publishers, Delhi, 1972.
- S. K. De, History of Sanskrit poetics, Vol – II, Calcutta Oriental press, 107, Calcutta 1925.

# संस्कृतच्छात्राणां सत्रार्धपाठ्यक्रमे सततमूल्याङ्कनप्रणाल्याः अनुप्रयोगः : एकं विश्लेषणात्मकम् अध्ययनम्।

डा. गणेश टि. पण्डितः[53]

**कुञ्चिशब्दाः**

सततम्, व्यापकम्, मूल्याङ्कनम्, आकलनम्, प्रणाली, अधिगमः, पाठ्यक्रमः, के.सं.वि.

**शोधसारः**

शिक्षाकेन्द्रस्थानां छात्राणाम् अधिगमगतेः अवधारणक्षमतायाः ज्ञानाभिवृत्योः कौशलादीनां च विज्ञानं शिक्षकाणाम् आद्यं कर्तव्यं वर्तते। एतदर्थं ते मूल्याङ्कनप्रणालीं समाश्रयन्ति।मूल्याङ्कनप्रणालीं समाश्रित्य दत्तांशानां सङ्कलनाय विश्लेषणाय व्याख्यानाय प्रतिपुष्टिप्रदानाय च प्रतिपदं प्रयतन्ते। उत्तमोत्तममूल्याङ्कनप्रणालीनां समाश्रयणेन उत्कृष्टाः अभीष्टाश्च एव परिणामाः तेभ्यः समुपलभ्यन्ते। अतः शिक्षणाधिगमप्रक्रियायां मूल्याङ्कनप्रणालीनां महन्महत्वं वर्तते। तत्र हि मूल्याङ्कनप्रणाली सततमूल्याङ्कनप्रणाली व्यापकमूल्याङ्कनप्रणाली इति प्राधान्येन द्वैविध्यम् ऋच्छति। नैरन्तर्येण प्रचलन्ती प्रणाली यत्र पुनः छात्राणां सततं नियतं च मूल्याङ्कनम् आसत्रान्तम् औपचारिकरूपेण अनौपचारिकरूपेण च सम्भवति सैव सततमूल्याङ्कनप्रणाली इति अभिधीयते। पुनः बालाय भाविनि काले सर्वतोमुखविकासं सम्प्राप्य समाजस्य सर्वोत्तमनागरिकः भवितुं या प्रणाली सहायिका वर्तते सा व्यापकमूल्याङ्कनप्रणाली इति अभिधीयते। यद्यपि इयं प्रणाली बालानां स्तरपरीक्षणपरिष्कारादिषु कर्मसु मन्दगत्या प्रवर्तते तथापि सर्वाङ्गीणविकासरूपस्य व्यापकलक्ष्यस्य परिपूर्तये तु इयं सहकारिणी वर्त्तते। एवं प्रणाल्याः प्रकारद्वयमपि प्रधानमेव वर्तते।

[53] सहायकनिदेशकः, नवदेहलीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यालयीयप्रकाशन-कार्यक्रमविभागस्य



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

==================================

संस्कृतच्छात्राणां सत्रार्धपाठ्यक्रमे सततमूल्याङ्कनप्रणाल्याः अनुप्रयोगार्थम् एतदर्थं बलं दीयते यत् शिक्षकः कक्ष्याशिक्षणसन्दर्भे पाठ्यसहगामिक्रियासु च छात्राणां तत्परतायाः अधिगमकाठिन्यानां च परिज्ञानं प्राप्य तेषां परीक्षणं प्रतिपदं कुर्वन् तेषां क्रमिकभाषिकविकासाय सर्वदा साहाय्यं कर्तुं शक्नुयात् इति । सततमूल्याङ्कनप्रणाल्याः अनुप्रयोगावसरे शिक्षकोऽपि सततरूपेण विभिन्नान् भाषासम्बद्धान् प्रविधीन् आश्रित्य बालानाम् अधिगमगतिं स्तरं काठिन्यं च परिशीलयति। एवं बालाः क्षमतानुगुणम् अभिरुच्यनुगुणम् अधिगच्छन्तः सन्ति वा नवेति विज्ञातुं सततमूल्याङ्कनप्रणाल्याः अनुप्रयोगः शिक्षकैः विधीयते इति फलितम्। तत्र पुनः मूल्याङ्कनम् (Evaluation) आकलनम् (Assessment) इति पदद्वयोः प्रयोगः प्रचुरमात्रेण शिक्षाविद्भिः क्रियते। आकलनम् आद्यं सोपानं मूल्याङ्कनम् अन्तिमम् इत्यत्र समाकलनीयम् ।

नवशिक्षानीतेरनुगुणं विषयविशेषाः समावेशिताः सन्ति। तत्र आद्यः प्राक्शास्त्रिस्तरः संस्कृतभाषाध्ययनदृष्ट्या आधारभूतः स्तरः वर्तते। सत्रचतुष्टये विभक्ते अस्मिन् पाठ्यक्रमे चतुर्विंशतिः विषयविशेषाः पत्राणि वा सन्ति। शतस्य अङ्कानां प्रत्येकमपि पत्रं ($24 \times 100 = 2400$) विशिष्टलक्ष्यपूर्तये सहकारि वर्तते। चतुर्णामपि सत्राणाम् आद्यौ द्वौ विषयौ (पत्रे) आधारभूतौ (Foundational) वर्तेते । छात्राः संस्कृतभाषाक्षेत्रं प्रविश्य संस्कृतवाङ्मयस्य शास्त्राणां च परिचयसम्पादनाय समर्थाः भवेयुः इति धिया आधारभूतौ विषयौ शीर्षस्थाने निक्षिप्तौ। संस्कृतभाषाज्ञानस्य कौशलस्य च परीक्षणदृष्ट्या अपि आधारभूतौ विषयौ प्रधानौ भवतः। अतः अत्र सततमूल्याङ्कनस्य विशिष्टं महत्त्वं वर्तते। सततमूल्याङ्कनावसरे बालानां कृते विशिष्टान् गतिविधीन् समायोज्य विभिन्नानां साधनानां साहाय्येन च तैः किं किम् अधिगतम् ? अधिगमसन्दर्भे तेभ्यः कुत्र कुत्र क्लेशः जायते ? इत्यादिकम् अभिज्ञातुं शक्नोति शिक्षकः । प्राक्शास्त्रिस्तरे प्रथमसत्रार्धे एते विषयाः सन्ति। यथा ते -

1. संस्कृतभाषाप्रवेशः - 01
2. उच्चारणकौशलम्
3. योगः ( प्रायोगिकः )
4. हिन्दी/ प्रादेशिकभाषा / आङ्ग्लभाषा / गणकविज्ञानम् ( एतेषु कश्चन अभीष्टः विषयः)
5. रसायनशास्त्रम्/अर्थशास्त्रम्/ इतिहासः/राजनीतिविज्ञानम् /समाजशास्त्रम् ( एतेषु कश्चन अभीष्टः विषयः)
6. गणितम्/जीवविज्ञानम् /मनोविज्ञानम् /भूगोलशास्त्रम् ( एतेषु कश्चन अभीष्टः विषयः)

एवं प्रकारेण विभक्तेषु पाठ्यक्रमेषु शीर्षस्थानस्थयोः भाषासम्बद्धयोः पत्रयोः अध्ययनेन सह आधुनिकभाषाणां विज्ञानगणितादीनां विषयविशेषाणाम् अध्ययनार्थमपि क्रमबद्धः अवसरः कल्पितः वर्तते। अत्र सततमूल्याङ्कनस्य प्रक्रमः एवं भवितुमर्हति। यथा -

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

1. **संस्कृतभाषाप्रवेशः**

प्राक्शास्त्रिस्तरीयाणां बालानां वाग्व्यवहाराभिवृद्धये शिक्षकः संस्कृतसम्भाषणशिबिरम् आदौ सञ्चालयेत् । सम्भाषणशिबिरं एकस्मिन् कालांशे करोति चेत्तर्हि आमासं सञ्चालयितुं शक्नोति। तत्र सततं मूल्याङ्कनं कर्तुं चतुर्विधानि उपकरणानि प्रयोक्तुं शक्यन्ते। तानि यथा -

१. मौखिकपरीक्षाप्रणाली (Oral Test )- मौखिकपरीक्षणमुखेन सततं मूल्याङ्कनम्

२.लिखितपरीक्षाप्रणाली - (Written Test) लिखितपरीक्षणमुखेन सततं मूल्याङ्कनम्

३. दत्तकार्यम् ( Assignment) - दत्तकार्यस्य माध्यमेन सततं मूल्याङ्कनम्

४. परियोजना (Project )- परियोजनानां माध्यमेन सततं मूल्याङ्कनम्

अत्र आद्ययोः महन्महत्वं वर्तते। यतोऽहि भाषणाद्भाषामधिगच्छति बालः। अतः वाक्यरचनासामर्थ्याभिवृद्धये शिक्षकः मौखिकपरीक्षां लिखितपरीक्षां च प्रतिपदं कुर्यात्। लिखितपरीक्षायामपि वाक्यखण्डानां मध्ये रिक्तस्थानानि मध्ये मध्ये प्रकल्पयेत् । तत्र एते उपायाः आश्रयणीयाः -

१. व्यक्तिशः संस्कृतेन आत्मपरिचयप्रदानाय अवसरप्रदानं तत् परीक्षणं च ।

२. सरलसंस्कृतेन प्रकृतिवर्णनाय / स्थानवर्णनाय / व्यक्तिवर्णनाय अवसरप्रदानं परीक्षणं च ।

३. सरलसंस्कृतेन वाक्यरचनार्थम् अवसरप्रदानं परीक्षणं च ।

४. सरलसंस्कृतेन लेखनाय अवसरप्रदानं परीक्षणं च ।

५. सुलेखस्य अनुलेखस्य श्रुतलेखस्य प्रतिलेखस्य च अभ्यासाय अवसरप्रदानं परीक्षणं च ।

एतेषां कार्याणां सम्पादनावसरे ये क्लेशम् अनुभवन्ति तेभ्यः उपचारात्मकशिक्षणव्यवस्थां शिक्षकः परिकल्पयेत्।

2. **उच्चारणकौशलम्**

अस्मिन् पत्रे अमरकोषस्य भगवद्गीतायाः सुभाषितानां शब्दधातुरूपाणां च निर्दिष्टः भागः वर्तते। अत्र कण्ठस्थीकरणाय बालेभ्यः प्रेरणा देया । यद्यपि कण्ठस्थीकरणविधिः अमनोवैज्ञानिकः वर्तते तथापि प्राथमिकस्तरे तत्रापि संस्कृतभाषाधिगमसन्दर्भे अस्य विधेः महन्महत्वं वर्तते। तत्र एते उपायाः शिक्षकेण अनुसर्तव्याः

१.आदर्शवाचनम् अनुवाचनं च - उच्चारणकौशलस्य अभ्यासे आदर्शवाचनम् अथवा सस्वरोच्चारणं प्रधानं वर्तते। बालाः प्रकृत्या अनुकरणशीलाः । यदि शिक्षकस्य उच्चारणं गतियतिलयभावपूर्णं विद्यते तर्हि बालाः अपि अनुकुर्वन्ति । अतः उच्चारणकौशलस्य विकासार्थम् आदर्शवाचनानुवाचनयोः विधी प्रयोक्तव्यौ। मौखिकपरीक्षणमपि अत्रैव सम्भवति।

२. कोषस्य गीतायाः सुभाषितानां च सान्द्रमुद्रिकाः सर्वत्र उपलभ्यन्ते । कक्ष्यासु तेषां प्रस्तुतीकरणेन छात्राः अभिप्रेरिताः सम्भवन्ति। कण्ठपाठाय पूरकाः तन्त्रांशाः अध्ययनाय योग्याः व्याख्यासहिताः भाष्यसहिताश्च अपि तन्त्रांशाः अद्यत्वे अन्तर्जालेषु प्रचुरमात्रेण उपलभ्यन्ते। तेषां सम्पर्कसूत्राणि बालेभ्यः देयानि । अवकाशकालेषु एतादृशानां संसाधनानां प्रदर्शनाय अपि कक्ष्यासु व्यवस्थाः कल्पनीयाः। अन्तर्जालसौकर्योपेताः वैद्युतिकजवनिकाः सर्वत्र संस्थापनीयाः ।

३. शब्दधातुरूपाणाम् अभ्यासः शब्दधातुरूपाणाम्



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

अभ्यासं सामूहिकरूपेण सम्पाद्य व्यक्तिशः कण्ठस्थीकृतानां शब्दधातुरूपाणां मूल्याङ्कनं मौखिकरूपेण अपि कर्तुं शक्यते। विविधाः तन्त्रांशाः अपि शब्दधातुरूपाणाम् अभ्यासाय ( Android Apps) समुपलभ्यन्ते । तेषाम् अपि अनुप्रयोगाय प्रशिक्षणं देयम्। प्रेरणापि देया। सृजन झा वर्यस्य शब्दरूपमाला , धातुरूपमाला ,अमरकोषः, शब्दकल्पद्रुमः इत्यादयः तन्त्रांशाः अत्यन्तम् उपकारकाः सन्ति। AIEUN LABS इत्यस्य धातुः इति तन्त्रांशः अपि संस्कृतच्छात्राणाम् उपकारकः एव । एतादृशानां तन्त्रांशानां नूतनतया निर्माणम् अवश्यं करणीयं वर्तते। भारतस्य प्रसिद्धैः विश्वविद्यालयैः स्वीयेषु पाठ्यक्रमेषु पारदर्शितायाः परिरक्षणाय पाठ्यक्रमानुरूपाः तन्त्राशाः ( JNU , BHU, NEHU इत्यादिभिः विश्वविद्यालयैः ) विनिर्मिताः सन्ति। अमूद्रक्षाः तन्त्रांशाः विश्वविद्यालयशिक्षकैः अपि सृष्टव्याः ।

3. **योगः (प्रायोगिकः)**

बालानां शरीरमनसोः उद्विकासाय तेषु योगाभ्यासपरिपाटेः संवर्धनाय च प्रथमे सत्रार्धे प्रायोगिकयोगाख्यः विषयः परिकल्पितः वर्तते। षड्मासेषु बालः योगाभ्यासे प्रशिक्षणं प्राप्नोति चेत्तर्हि नित्यजीवने सः योगाभ्यासं कर्तुं समर्थः भविष्यति। अन्ताराष्ट्रिययोगदिवसः अद्यत्वे सर्वत्र महता वैभवेन समाचर्यते । योगस्य महत्त्वं छात्राः अवगच्छेयुः तदर्थं प्रशिक्षताश्च भवेयुः इति इयं व्यवस्था कल्पिता वर्तते। १०० अङ्काः प्रायोगिकयोगस्य निमित्तं निर्दिष्टाः सन्ति। कुशलः योगशिक्षकः बालानां मूल्याङ्कनं प्रतिपदं कर्तुं शक्नोति। विविधानाम् आसनानां प्राणायामपरिपाटेश्च शिक्षणं परीक्षणं च सुकरमपि वर्तते।

4. **हिन्दी/ प्रादेशिकभाषा / आङ्ग्लभाषा / गणकविज्ञानम्** ( एतेषु कश्चन अभीष्टः विषयः) भाषाणां गणकविज्ञानस्य च अध्ययनाय अस्मिन् पत्रे मुक्तः अवसरः वर्तते। यथा संस्कृतभाषाशिक्षणे सततमूल्याङ्कनप्रणाल्याः अनुप्रयोगः क्रियते तथा अत्र अपि विभिन्नभाषाणां निमित्तं विभिन्नानां प्रणालीनाम् अनुप्रयोगः शक्यते। गणकविज्ञानं तु सत्रचतुष्टये वैकल्पिकरूपेण समायोजितं वर्तते। तृतीये सत्रे अर्थात् पञ्चदशे पाठ्यक्रमे प्रायोगिकं सङ्गणकम् इति नियतः पाठ्यक्रमः (सर्वेषां निमित्तम् ) समायोजितः वर्तते। गणकयुगे प्रायोगिकगणकस्यापि ज्ञानम् अत्यन्तम् अनिवार्यं विद्यते। अस्मिन् विषये विशेषासक्तिमतां तु वैकल्पिकः अवसरः वर्तते एव । सर्वः सर्वेषु सत्रेषु आधूरभूतान् कौशलकेन्द्रितान् च अनिवार्यविषयान् विहाय वैकल्पिकपाठ्यक्रमेषु स्वाभीष्टं विकल्पं चेतुमत्र यथेष्टम् अवसरः कल्पितः वर्तते। एवमेषः सत्रार्धपाठ्यक्रमः छात्रहितैषी नवशिक्षानीतेरनुरूपश्च विद्यते।

5.**रसायनशास्त्रम्/अर्थशास्त्रम्/इतिहासः/राजनीतिविज्ञानम् /समाजशास्त्रम्** ( एतेषु कश्चन अभीष्टः विषयः) आधुनिकविषयविशेषाः संस्कृतमाध्यमेन अपि संस्कृतच्छात्राणां कृते अध्ययनार्थं समायोजिताः वर्तन्ते। एतेषां विषयविशेषज्ञाः शिक्षकाः स्वयमेव निर्णेतुं प्रभवन्ति यत् स्वविषयविशेषस्य अध्यापनेन सम्बद्धाः मूल्याङ्कनप्रणाल्यः काः काः ? इति।

Since 2010
ISSN- 0976-8645
UGC RN-41039

आधुनिकमहाविद्यालयेषु अमीषां विषयविशेषाणां शिक्षणाय अध्यापनाय वा ये विधयः उपयुज्यन्ते ते एव अत्र उपयोक्तुं नैव शक्यन्ते इत्यंशः ( छात्रभेदे उपक्रमभेदः इति न्यायेन) मनसिकृत्य कार्यं सम्पादनीयम् । संस्कृतविश्वविद्यालयीयानां छात्राणां विकासाय पूरकाः NCERT मानदण्डानुरूपाश्च एव विधयः भवेयुः।

**6.गणितम्/जीवविज्ञानम् /मनोविज्ञानम् /भूगोलशास्त्रम्** ( एतेषु कश्चन अभीष्टः विषयः)
प्रथमे सत्रार्धे अन्तिमः वैकल्पिकविषयोपेतः पाठ्यक्रमः अपि विशिष्टः एव। गणितविज्ञानादिषु विषयेषु उच्चमाध्यमिकस्तरीयः पाठ्यक्रमः कीदृशः भवेत् इति राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा (NCERT) निर्धारितः वर्तते। सः एव मानदण्डः अत्र अपि स्वीकार्यः एव। सत्रचतुष्टये एते सर्वे (षष्ठस्य पाठ्यक्रमस्य) वैकल्पिकविषयविशेषाः वर्तन्ते। अतः भाषाशिक्षणेन सह परम्परागतशास्त्राणां आधुनिकगणितविज्ञान-मनोविज्ञानादीनां च विषयाणाम् अध्ययनं सुखेन कर्तुं केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्राक्शास्त्रिणां /संस्कृतच्छात्राणां कृते अवसरः अधुना वर्तते।
प्राक्शास्त्रिस्तरे द्वितीये सत्रार्धे एते विषयाः सन्ति। यथा ते -

**7.संस्कृतभाषाप्रवेशः - 02**
**8. संस्कृतभाषाप्रवेशः - 03**
**9. सम्प्रेषणकेन्द्रिता आङ्ग्लभाषा** Communicative English
**10. शास्त्रम् - व्याकरणम् / ज्यौतिषम् / धर्मशास्त्रम्/ दर्शनम् /जैनदर्शनम्/भौतशास्त्रम्** (Physics) **/सङ्गणकविज्ञानशास्त्रम्** - Computer Science ( एतेषु कश्चन अभीष्टः विषयः)
**11. तर्कसोपानम् /भारतीयस्वास्थ्यपद्धतिः (आयुर्वेदः )/ भारतीयगणितपरिचयः**( एतेषु कश्चन अभीष्टः विषयः)
**12. गणितम्/जीवविज्ञानम् /मनोविज्ञानम् /भूगोलशास्त्रम्** ( एतेषु कश्चन पूरकः विषयः)
द्वितीयसत्रार्धस्थः सप्तमः पाठ्यक्रमः संस्कृतभाषायाः संरचनाक्षेत्रे प्रवेशार्थं साहाय्यं विदधाति। संस्कृतभाषाप्रवेशः - 02 इति शीर्षकान्वितस्य अस्य पाठ्यक्रमस्य अध्ययनार्थं ' व्यवहारप्रदीपः -१ ' इत्येतस्य ग्रन्थस्य प्रथमभागः निवेशितः वर्तते। कारकाणाम् अपि ज्ञानं अनेन सहैव सम्भवति। स्वाध्याययोग्यः ग्रन्थः एषः इत्यतः एतस्य पठनपाठनादिषु न कोऽपि क्लेशः वर्तते। द्वितीयसत्रार्धस्थः अष्टमः पाठ्यक्रमः अपि संस्कृतभाषाप्रवेशः - 03 इति शीर्षकान्वितः ' व्यवहारप्रदीपः - २' इति पाठ्यपुस्तकेन संयुक्तश्च वर्तते। अत्र सन्धिः पाठ्यविषयेषु प्रधानः भागः वर्तते। कारकसन्धिसमासादीनां ज्ञानाभावे बालः भाषायाः संरचनात्मपक्षम् अवगन्तुं नैव शक्नोति।स्वाध्याययोग्यः पाठ्यक्रमः एषः इत्यतः बालानां सुखबोधः अत्र अपि सहजतया सम्भवति।
द्वितीयसत्रार्धस्थः नवमः पाठ्यक्रमः आङ्ग्लभाषायां व्यवहारकौशलयोः विकासार्थमेव परिकल्पितः। Communicative English इत्येषः पाठ्यविषयः मनोवैज्ञानिकक्रमेण आङ्ग्लभाषायाः शिक्षणे सहायकः वर्तते। भारतस्य सांस्कृतिकराष्ट्रियप्रादेशिकभाषाभिः सह आङ्ग्लभाषायाः अपि अध्ययनार्थं विश्वविद्यालयेन सौकर्यम् अत्र कल्पितम् अस्ति। भाषिककौशलविकासाय एव अयं विषयः नियतरूपेण




Since 2010
ISSN- 0976-8645
UGC RN-41039

सर्वैः द्वितीयसत्रे अध्येतव्य एव। एतदग्रे शास्त्रशिक्षणस्य परिचयार्थमेव दशमे पत्रे शास्त्राणि वैकल्पिकरूपेण समायोजितानि सन्ति। स्वाभीष्टं शास्त्रं चेतुमत्र यथेष्टम् अवसरः बालेभ्यः कल्पितः वर्तते। ज्ञानविज्ञानयोः समागमरूपः एषः दशमः पाठ्यक्रमः(पत्रम्) परम्परागताधुनिकविषयान् एकस्यामेव वेदिकायां प्रदर्शयति। एवमेव एकादशः पाठ्यक्रमः बौद्धिकशारीरकमानसिकपक्षैः सम्बद्धः वर्तते। अत्र विद्यमानाः विषयाः ( तर्कसोपानम् /भारतीयस्वास्थ्यपद्धतिः (आयुर्वेदः )/ भारतीयगणितपरिचयः ) एकैकेन पक्षेण विशेषरूपेण सम्बद्धः वर्तते। अत्र छात्रः स्वेच्छया स्वाभीष्टं कमपि विषयं चित्वा अध्येतुं प्रभवति।
द्वितीयसत्रार्धस्थः द्वादशः पाठ्यक्रमः गणितम्/जीवविज्ञानम् /मनोविज्ञानम् /भूगोलशास्त्रम् इत्येतैः पूरकैः ( Additional) वैकल्पिकविषयैः संलग्नः वर्तते। सामान्यगणिते बालमनोविज्ञाने जीवविज्ञाने भूगोलशास्त्रे वा बालः पूरकम् अध्ययनं विधातुं शक्नोति। एवं द्वितीयसत्रार्धेन सह प्राक्शास्त्रिणां प्रथमवर्षीयः पाठ्यक्रमः सम्पन्नः भवति। प्राक्शास्त्रिस्तरे सत्रस्य सर्वस्य अध्यापनकालांशः - क्रेडिट् - अङ्कादिकं पूर्वमेव निर्धारितं वर्तते इत्यतः सर्वेषु स्थलेषु पत्रेषु च क्रमिकता परिदृश्यते।
प्राक्शास्त्रिस्तरे तृतीये सत्रार्धे एते विषयाः सन्ति। यथा ते -

**13.संस्कृतवाङ्मयपरिचयः - १.वैदिकवाङ्मयम् २.लौकिकवाङ्मयम्**
**14. सङ्क्षेपरामायणं समासः च**
**15. प्रायोगिकसङ्गणकम्**
**16. हिन्दी/ प्रादेशिकभाषा / आङ्ग्लभाषा / भौतशास्त्रम् गणकविज्ञानम्** ( एतेषु कश्चन अभीष्टः विषयः)
**17.रसायनविज्ञानम्** ( Chemistry) / **अर्थशास्त्रम्** (Economics )/**इतिहासः** ( History) / **राजनीतिविज्ञानम्** ( Political Science)/ **समाजशास्त्रम्** (Sociology)
**18.गणितम्** Mathematics/ **जीवविज्ञानम्** Biology/ **मनोविज्ञानम्** Psychology/ **भूगोलशास्त्रम्** Geography
तृतीये सत्रार्धे आधारभूतविषयत्वेन संस्कृतवाङ्मयपरिचयः इति ग्रन्थः उपनिबद्धः वर्तते ।एषः त्रयोदशः पाठ्यक्रमः (course) वैदिकवाङ्मयस्य लौकिकवाङ्मयस्य च परिचयं प्रयच्छति। सरलमानकसंस्कृतेन वैदिकसाहित्यस्य लौकिकसाहित्यस्य च परिचयेन बालानां संस्कृतवाङ्मये अभिरुचिः संवर्धते। वाङ्मये सामान्यज्ञानस्य विकासाय अपि एषः विषयः/ पत्रं भृशं साहाय्यं करोति। चतुर्दशः विषयः आदिकाव्यस्य साररूपः 'सङ्क्षेपरामायणम् इति नाम्ना ज्ञायते। काव्यस्य अध्ययनार्थं बालानां भावात्मकपक्षस्य विकासार्थं च एषः विषयः लाभदः वर्तते। समासः इत्येषः व्याकरणेन सम्बद्धः विषयः अपि अस्मिन् पत्रे निवेशितः वर्तते। पञ्चदशः विषयः ' प्रायोगिकसङ्गणकम् ' इति नाम्ना ज्ञायते। सङ्गणककौशलाभिवृद्धये अयं विषयः नियतरूपेण सर्वैरपि छात्रैः अध्येतव्य एव । सङ्गणकयुगेऽस्मिन् संस्कृतच्छात्राः सङ्गणकानुप्रयोगे कुशलाः भवेयुः इति धिया अयं विषयः उपकल्पितः वर्तते। षोडशः विषयः

प्रादेशिकभाषायाः हिन्दीभाषायाः आङ्ग्लभाषायाः च अध्ययनाय वैकल्पिकम् अवसरं कल्पयति। सङ्गणके भौतशास्त्रे च विशेषासक्तिमतां कृतेऽपि अध्ययनावसरः अत्र प्रकल्पितः विद्यते।सप्तदशः विषयः आधुनिकविषयविशेषैः भूयिष्ठः वर्तते। छात्रेभ्यः एतेषु अभीष्टविषयस्य चयनाय स्वातन्त्र्यम् अस्ति। अष्टादशः विषयः अपि

आधुनिकविषयविशेषैः भूयिष्ठः एव । परन्तु क्षेत्राणि प्रतिपत्रं विशिष्टानि सन्ति इत्यतः व्यापकः पाठ्यक्रमः (course) एषः इति वक्तुं शक्यते। पूरकविषयत्वेन ( additional) अत्र बहवः विकल्पाः प्रदत्ताः सन्ति। प्राक्शास्त्रिस्तरे चतुर्थे सत्रार्धे एते विषयाः सन्ति। यथा ते -

19. **शास्त्रपरिचयः** -१ दर्शनम् - आस्तिकानि नास्तिकानि च।

20.**शास्त्रपरिचयः** - २

1.व्याकरणम् 2. साहित्यम्

21.**शास्त्रपरिचयः** - ३

१. धर्मशास्त्रम् २. पुराणेतिहासः ३. वास्तुशास्त्रम् ४. ज्यौतिषम्

22. **परियोजनाकार्यं प्रशिक्षुता च - रूपकम् , अनुवादः, योगः , सङ्गणकविज्ञानम्** ( Computer Science) **भौतशास्त्रम्** ( Physics)

23.**शास्त्रम् - साहित्यम् / व्याकरणम्/ ज्योतिषम् / धर्मशास्त्रम्/ रसायनशास्त्रम्**

24. **गणितम्/जीवविज्ञानम् /मनोविज्ञानम् /भूगोलशास्त्रम्** ( एतेषु एकम् अतिरिक्तं पत्रम्)

अन्तिमसत्रार्धस्य सर्वाणि पूर्वतनैः सम्बद्धानि एव सन्ति। परियोजनासम्बद्धं प्रशिक्षुतासम्बद्धं च पत्रमात्रं विशेषरूपेण परिगणनीयमस्ति । क्रमशः यथा - नवदशे पत्रे साङ्ख्य - योग- न्याय- वैशेषिक - पूर्वमीमांसा - उत्तरमीमांसा इत्येतानि आस्तिकदर्शनानि पुनः चार्वाक - बौद्ध - जैनेति त्रीणि नास्तिकदर्शनानि समावेशितानि सन्ति। आस्तिकनास्तिकदर्शनेषु समेषां छात्राणां गतेः मतेः च संवर्धनाय आधारभूतविषयरूपेण इदं पत्रम् उपनिबद्धम् अस्ति।

विंशः विषयः शास्त्रपरिचयः - २ इति उच्यते। तत्र व्याकरणं साहित्यम् इति विशेषरूपेण द्वयोः शास्त्रयोः परिचयः छात्रेभ्यः उपलभ्यते। प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्त्वात् सर्वविद्यानाम् इति काव्यशास्त्रमर्मज्ञेन आनन्दवर्धनेन सानन्दम् उच्यते। 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ' इति सुभाषितकारः भणति। अतः व्याकरणसाहित्ययोः अध्ययनं बालैः अवश्यं विधेयम् इति पत्रमिदं निर्दिष्टम् अस्ति। एकविंशः विषयः अपि शास्त्रकेन्द्रितः एव वर्तते। चतुर्थसत्रार्धस्य आद्यानि त्रीणि पत्राणि आधारभूतानि शास्त्रोत्तजकानि नियतरूपेण संस्कृतच्छात्रैः अध्येतव्यानि च सन्ति। अनेन इदं सिद्ध्यति यत् संस्कृतच्छात्राः शास्त्रिस्तरप्रवेशात् प्रागेव दर्शनेषु शास्त्रेषु च सामान्यज्ञानं वहन्ति इति। दर्शनेषु शास्त्रेषु च प्राप्तपरिचयाः छात्राः शास्त्रिस्तरे स्वाभीष्टं शास्त्रं पठितुम् एकीकृतपाठ्यक्रमे प्रवेष्टुं ( चतुर्वर्षीये पाठ्यक्रमे वा ) अर्हाः सम्भवन्ति इति। द्वाविंशः विषयः परियोजनासम्बद्धः प्रशिक्षुताकार्यक्रमेण संलग्नः क्रियाकेन्द्रितः चास्ति। रूपके, अनुवादे , योगे , सङ्गणके ,भौतशास्त्रे वा सन्निहितानां कौशलानाम् अवाप्तये अत्र अवसरः वर्तते।

तदग्रिमः त्रयोविंशः पाठ्यक्रमः एकस्य (साहित्य -





व्याकरण- ज्योतिष - धर्मशास्त्र- रसायनशास्त्रम् इत्येतेषु शास्त्रेषु) स्वाभीष्टविषयस्य निर्दिष्टशास्त्रस्य वा अध्ययनाय छात्रान् अभिप्रेरयति। अन्तिमः चतुर्विंशः पाठ्यक्रमः यथापूर्वं पूरकविषयैः (गणितम्/जीवविज्ञानम् /मनोविज्ञानम् /भूगोलशास्त्रम्) संलग्नः वर्तते।

**उपसंहारः**

एवं चतुर्विंशतिः पत्राणि वर्षद्वयस्य निमित्तं कल्पितानि सन्ति। परम्परागताधुनिकविषयाणां समाहारोपमः एषः प्राक्शास्त्रिस्तरीयः पाठ्यक्रमः भारतीयज्ञानप्रणाल्याः ( IKS ) आधुनिकज्ञानप्रणाल्याश्च (MKS) संयुक्तरूपः वर्तते। विशेषो नाम आधारभूतानि पत्राणि नव सङ्ख्याकानि कौशलप्रधानानि चत्वारि पत्राणि , सप्त सङ्ख्याकानि वैकल्पिकपत्राणि, चत्वारि पूरकपत्राणि इत्येवं चतुर्मुखविकासाय चतुर्विंशतिः पत्राणि मनोवैज्ञानिकक्रमेण प्राक्शास्त्रिस्तरे उपनिबद्धानि सन्ति। एतैः सह उपचारात्मकशिक्षणम्, ग्रन्थालयदर्शनम्, दत्तकार्याणि , प्रशिक्षुता , प्रायोगिककार्याणि च सर्वेषु सत्रेषु अनिवार्याणि सन्ति। एकैकस्य पत्रस्य निमित्तम् अपि इमानि विशिष्टरूपेण आयोजनीयानि सन्ति। एकैकस्य पत्रस्य शिक्षणाय एकैकस्मिन् सत्रे 64 घण्टाः निर्दिष्टाः सन्ति। एकैकस्मिन् सत्रे षट् संङ्ख्याकानि पत्राणि सन्ति। आहत्य 384 (64×06= 384) घण्टाः एकस्मिन् समग्रसत्रे शिक्षणनिमित्तम् उपयुज्यन्ते। चतुर्णां सत्राणां निमित्तं 1536 घण्टाः वर्षद्वये उपयुज्यन्ते/ व्ययिताः भवन्ति। पुनश्च उपचारात्मकशिक्षणग्रन्थालयदर्शनादीनां निमित्तं पर्याप्तः समयः शिक्षकैः देयः एव। एवं सत्रार्धप्रणाली तर्कसङ्गता परीक्षणार्थम् इदम्प्रथमतया अनुप्रयुक्ता चास्ति।

## सन्दर्भग्रन्थसूची

1. संस्कृतशिक्षणम् - विनयकुमारः , २०१९, अच्युतप्रकाशनम् , मैसूरु
2. संस्कृतभाषा और शिक्षण शास्त्र - चेतन कुमार बनानी विश्वास,२०१५, NCERT
3. संस्कृत शिक्षण - रामशकल पाण्डेय, १९९० , श्री विनोद पुस्तक मन्दिर , आगरा

## परिशीलतजालस्थानसूची

१. More effective, engaging learning — from anywhere, Accessed on-10.01.2023, www.goguardian.com
२. Sanskrit, (12.01.2023) Accessed on 15.01.2023, https://en.wikipedia.org/wiki/Sanskrit
३. What is the meaning of intermediate education in India?, Accessed-15.01.2023, https://www.quora.com/What-is-the-meaning-of-intermediate-education-in-India

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

# नाथानां यौगिकी शक्तिः

डा. के. एस्. सुमन्[54]

## कुञ्चिशब्दाः

नाथपथः, गोरक्षनाथः/गोरखनाथः, मत्स्येन्द्रनाथः, योगविद्या, गोपीचन्द्रः, जालन्धरनाथः, चौरङ्गिनाथः, बङ्गदेशः, भर्तृहरिः, अप्पावरु

## शोधसारः

"अप्राप्तस्य प्राप्तिरेव योगः, प्राप्तस्य परिरक्षणं क्षेमः" इति ललक्ष योगक्षेमौ भगवान् आनन्दतीर्थयोगी त्रयोदशशतमाने एव । एतस्मिन्नेवार्थे खलु परमात्मा श्रीकृष्णः निजगाद गीतायां यत् एतादृशं योगं क्षेमञ्च वहाम्यहम् इति । ननु तर्हि किमप्राप्तम्? यस्य प्रापणाय वयं यतेम योगवन्तो आहोस्वित् युक्ता वा योगिनो वा भवेम इति मनसि वरीवर्ति नु संशीतिः ! तस्यापि प्रश्नस्य युदुनन्दन एव उत्तरमुत्तारयति सप्तशत्यां "समत्वं योग उच्यते", "योगः कर्मसु कौशलम्" इत्यादि । ननु यादवः अन्यत्र "योगस्थः कुरु कर्माणि" इति ब्रूते । यदि कर्मसु कौशलं योग उच्यते तर्हि "कर्मकौशलस्थः कुरु कर्माणि" इति उक्तम्भवति हि ! कथमेतत्सङ्गच्छते ? कर्मकरणात् कौशलं प्राप्यते वा कौशलवान् कर्म कुर्याद्वा ? किमत्र साधु ? अन्योन्याश्रयः खलु ? उभयमपि साधु कृष्णमते । किञ्चित् कर्मविषये ज्ञात्वा कर्म करोतु । ज्ञानपूर्वककरणात् कौशलं प्राप्यते । एवमेव कर्मविषये विदित्वा विदित्वा कौशलं संप्राप्य योगी भव इति तद्धार्दम् । अत उक्तन्तेन "**कर्मणैव हि संसिद्धिमास्थिता जनकादय**" इति । एवञ्च योगमार्ग एव अर्थात् ज्ञानपूर्वककर्माचरणमेव मोक्षावाप्तये अन्यादृशो मार्ग इति सकलशास्त्राणां हार्दम् अभिव्यनक्ति भगवान् श्रीकृष्णः । सहस्राधिकेभ्योपि वर्षेभ्य इममेव पन्थानमाश्रित्य महत्सिद्धिमापुः अस्मदृषयः । तानेव वयं योगिनः अथवा नाथा इति अद्य जानीमः । यदा एते स्वयोगसाधनया विषयान् सर्वान् स्ववशङ्कुर्वन्ति तदा एतेषां वचनमनुसृत्य जगदपि जेगीयते लेलीयते बोभूयते वा । अतः खलु भवभूतिरकथयत् - "**ऋषीणां पुनराद्यानां वाचमर्थोनुधावति**" इति ।

==================================

यद्यपि नाथपथे समागतानां महात्मनां काल-देश-शिष्यादिविषये अद्यापि इदमित्थमिति निर्णीतिः विद्वत्सु न वर्तते तथापि स्वामि मत्स्येन्द्रनाथस्य तथा तच्छिष्यस्य श्रीगोरखनाथस्य साधन-काल-देशादिविषये नास्ति नासीदपि विपश्चिदपश्चिमेषु कश्चन संशयलेशोपि । तत्र तावत् श्रीमत्स्येन्द्रनाथमहाभागस्तु आदिनाथाख्येन साक्षात् परमशिवेनैव योगविद्यामधिगम्य महान् योगी सञ्जात इति तु निश्चप्रचमेव जगतीतले । तस्माच्च महागुरोः श्रीगोरखनाथः अथवा गोरक्षनाथस्वामी सरहस्यां योगविद्यामवाप्य स्वाचार्य इव प्रपञ्चे कर्मनिबद्धज्ञानं प्रससार इत्ययमस्माकं भारतीयानां मोदावहोऽयं विषयः । एतदन्तेवासिनस्तु गोरखनाथिनः अथवा काणपाठा इति अद्य यावत् प्रथितयशसः । एते तु नाथाख्यपरमशिव इव स्वकर्णयोरुपास्थिपर्यन्तं कुण्डले धरन्ति सम्प्रदायम् अनूचानतया परिपालयन्ति च इत्यपि श्लाघनीयोऽयं विषयः । एते च शिष्याः अद्य अस्मद्राष्ट्रे सर्वत्र प्रसृता

54 संस्कृतविभागाध्यक्षः , लोयोला महाविद्यालयः(स्वायत्तम्),चेन्नै नगरम्, तमिळुनाडु.



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

दरीदृश्यन्ते ।

स्वामि मत्स्येन्द्रनाथस्य विषये एका प्राचीना जनजनिता सत्यकथा श्रूयते - कदाचित् जगतां नाथः श्रीपरमशिवः स्वपत्नीं गौरीं योगविद्याम् उपदिशन्नासीत् समुद्रतटे । किन्तु भगवती गौरी जगद्धिताय निद्राङ्गतेव व्यरराज । तदा मत्स्येन्द्रनाथः झषरूपेण तत्सर्वं शुश्राव । एतज्ज्ञात्वा पर्वतीपतिः (इन्द्रः = इदि परमैश्वर्ये) ज्ञानाख्यपरमैश्वर्यं प्राप्तवन्तं, नाथाख्यस्य स्वस्य भक्तञ्च तं झषं ('मत्स्य + इन्द्र + नाथ') मत्स्येन्द्रनाथ इति नाम्ना शब्दापयामास । किन्तु स्वोद्देशकं ज्ञानं अकस्मात् प्राप्तवन्तं तञ्च मत्स्येन्द्रनाथं "कञ्चित्कालं यावत् शिवोपदिष्टविद्यारहितो भव" इति शशाप शर्वाणी । तस्मात् सः अन्यस्मिन् जन्मनि शिवात् प्राप्तेन योगज्ञानेन महान् योगी भूत्वा गोरक्षनाथादिशिष्यान् अध्यापयामास इति विज्ञायते ।

बङ्गदेशीये गोरक्षविजये अथवा मीनचेतने तु "मत्स्येन्द्रनाथः कञ्चित्कालं यावत् अस्सामदेशीये कदलीराज्ये वर्तमानानां मायाविद्यावतां महाराज्ञीनां प्रेमपाशे सम्लग्नः स्वीयां शैवीं योगविद्यां , तासां मायाजाले च पपात । तदा तच्छिष्यः श्रीगोरक्षनाथः तासां षोडशशतात्मिकानां दुष्टस्त्रीणां हार्दं ज्ञात्वा स्वयमेव स्त्रीवेषेण तत्र गत्वा ताश्च महिळाः स्वयोगविद्यया जतुकाः कृत्वा स्वगुरुं पुनः तद्दत्तविद्ययैव यथापूर्वमकल्पयत् । अद्यापि अस्सामदेशस्य कदलीनगरे वतमानासु गुहासु परश्शतात्मिकाः जतुकाः दृग्गोचराः भवन्ति"- इति एवं वङ्गदेशीये पुस्तके विभिन्नः कथानकः श्रूयते ।

एवमेव बग्चिमहोदयेन सम्पादिते कौलज्ञाननिर्णयाख्ये पुस्तके – "भगवान् शिवः स्वयमेव धीवररूपेण मत्स्येन्दनाम्ना अवततार कौलज्ञानोपदेशाय । तन्त्रज्ञाननिपुणाः देव्युपासकाः योगिनस्तावत् पूर्वं कौला इति ख्यातिमभजन् । ततो मत्स्येन्द्रनाथस्योपदेशेन नाथपथमन्वसरन्" इति लिखितमस्ति ।
यदपि स्यान्नाम, किन्तु एताभ्यस्सर्वाभ्य अपि कथाभ्यः मत्स्येन्द्रनाथस्य महागुरोः तद्विद्यायाः तच्छिष्याणां वा वैशिष्ट्ये काचिदपि त्रुटिः न दृश्यते इति तु सुष्ठु विजानीमः । तत्रभवतः स्वामिमत्स्येन्द्रनाथस्य अन्तेवास्यग्रगण्यस्य श्रीगुरुगोरखनाथस्य शिष्येषु प्रवरः श्रीजालन्धरनाथः । नेपालदेशे लब्धात् कस्माच्चित् नाटकात् इदन्तु विद्मः यत् - जालन्धरनाथः स्वजीवनविषये स्वशिष्यं गोपीचन्द्रमुपदिशन् - 'अहन्तु पूर्वं जालन्धरस्य नृपतिरासम् । यच्च राज्यं , स्वसप्तशताधिकाश्च पत्नीः च आसन् तत्सर्वं त्यक्त्वा इमं योगमार्गं गुरुवर्याणां गोरखनाथानां उपदेशामृतं च पिपासुः समागमम्' इति कथयति ।

एवमेव अन्यः कश्चन योगी पूर्वं उज्जयिन्याः नरपतिरासीत् भर्तृहरिनामकः । अयमेव राज्ञ्याः मय्नामत्याः अनुजः गोपीचन्द्रस्य च मातुलश्च अवर्तत इत्यपि श्रूयते । गोरखनाथमपहाय चौरङ्गिनाथ इति शिष्यान्तर आसीत् श्रीमत्स्येन्द्रनाथगुरोः यश्च वङ्गेशस्य पालराज्यस्य युवराज आसीत् । वस्तुतः चौरङ्गिनाथस्य हस्तौ, पादौ च स्वसापत्नजनन्या खण्डिताः यदवस्थायामेव सः कानने परित्यक्तश्च । सन्दर्भेस्मिन् वने गुरुवर्यः मत्स्येन्द्रनाथः तमपश्यत् उपादिशच्च द्वादशवर्षाणि सकलयोगविद्याम् । यया न केवलं चौरङ्गिनाथः स्वाङ्गानि यथापूर्वमपश्यत् किन्तु मोक्षसाधनेपि निरततामभजत । विषयास्त्विमे गिरीशचन्द्र डे विरचिते पूर्णचन्द्राख्ये वङ्गदेशीये नाटके

प्रस्तावितास्सन्ति । चौरङ्गिनाथस्तु देवपालस्य पुत्र इति विज्ञायते । नेपालदेशे तु इमं मत्स्येन्द्रनाथगुरुं अवलोकितेश्वरनाम्ना सम्मानयन्ति । एवमेव मराठदेशसंप्रदायादपि महायोगिनः गोरक्षनाथस्य सम्बन्धं ज्ञानेश्वरस्य पितामहेन गोविन्दपन्थेन सह आसीदिति आबहोः कालादेव वयं ज्ञातुं पारयामः ।

एतादृशः योगिनः न केवलमुत्तरभारते अपि तु दक्षिणभारतेप्यासन् ये च केवलं स्वतपोमहिम्ना योगविद्ययैव अनेकाः शिष्यकोटीः समनुगृह्णन् । आसीत् कश्चन महान् योगी इभरामपुर कृष्णाचार्यनामकः अष्टादशशततमे काले कर्णाटकान्ध्रप्रदेशसीम्नि जीवमानः । स च यद्यपि अनादिपरंपराप्राप्तवैदिकविद्यया शोभितः स्वयोगविद्यया अपरोक्षज्ञानवान्श्च तथापि भगवद्भक्तेषु सामान्य इव विराजमान आसीत् । तस्य च महात्मनः सामर्थ्यमेतदवर्तत यत् विना गन्धादिलेपनयापि शौचादिभ्यः प्रागपि सर्वदा परिमळपूर्णदेहवान् आसीत् । स च यत्र यत्र गच्छति स्म स स सर्वोपि प्रदेशः सुवासितो भवेत । एतादृक् महात्मा कदाचित् प्रतिसंवत्सरमिव नरसिंहजयन्त्यङ्गत्वेन सुरपुराख्यं नगरं जगाम । स चासीत् पुष्यमासः । मध्येमार्गं योगी कृष्णाचार्यः कुलकर्ण्याख्यस्य कस्यचन भक्तस्य गृहे एव तद्रात्रिम् व्यययामास । तस्मिन्नवकाशे कुलकर्णी योगिनः सेवाङ्कुर्वन् "हे योगिन् ! आगामि मध्वनवम्युत्सवे कृपया अस्मद्गृहमागत्य अस्मान् उद्धरत्विति" भक्त्या व्यजिज्ञपत् । किञ्चिद् समालोच्य बभाषे कृष्णार्यः "अस्तु , नूनमागमिष्यामि तद्दिने द्वादशवादने ह्यपराह्ने । यतः, तस्मिन्नेव दिने मया गन्तव्यमस्ति सोल्लापुर"मिति वाचो दत्तवान् । माघो मासस्समागतः । रथसप्तमी तथा भीष्माष्टमी चेति उभेपि तिथी व्यतीते । योगिनः आगमनवार्तापि न श्रुता आहोस्वित् विज्ञाता । कुलकर्ण्याः मनसि उद्विग्नता व्यथा, वाचि मूकता च सहैव समुत्पन्ना । "ऋषीणां पुनराद्यानां वाचमर्थोनुधावति" इति आर्षवाक्यानुसारेण यदपि ऋषयः कथयन्ति तद् यद्यपि न घटनायोग्यं तथापि तत्तपःप्रभावेण नूनं भविता । किन्तु कुलकर्णी इदानीं बहून् परिवारजनान्श्च आहूतवान् उत्सवार्थं योगिदर्शनार्थञ्च इत्यतो बहुव्याकुलः सञ्जातः । समयो हि पञ्चन्यूनद्वादशवादनं सञ्जातम् । तदैव काचन रोमाञ्चनकारिणी घटना जाता । गृहस्य पूजागर्भप्रकोष्ठात् किमिपि अद्भुतं कस्तूरीपरिमळं निस्सरत् सर्वत्र प्रससार । येन सर्वे भक्ताः व्यामोहिताः देवगृहं प्रति अधावन् । तत्र च नैवेद्यम् निहितमसीत् । यदा देवगृहद्वारं उद्घाटितं तदैव तेषां भीतिजनकः कश्चन घटसर्पः दरीदृश्यत । तन्मध्ये योगिनः श्रीकृष्णाचार्यस्य मुखं स्पष्टम्प्रत्यभात् । तदा कुलकर्णिनः तथा तत्परिवारजनानां वदनानि नवकुन्दानीव विकसितानि । अतः खलु बाणभट्टः कथयति - "महात्मनां नामग्रहणेनैव वयं पुनीता भवेम किम्पुनर्दर्शनेन" इति ।

एवमेव पुनरपि कुलकर्णी महोदयः सपरिवारः श्रीकृष्णाचार्यस्य योगिनः गृहं गत्वा साष्टाङ्गं प्रणिपत्य 'अस्मिन् संवत्सरे तु भवद्भिः अवश्यमागन्तव्यमेवेति' प्रार्थयामास । तथैव एतस्मिन्नपि वर्षे सर्वे मध्वनवमीदिवसे योगिनः दर्शनार्थं उत्साहातिशयेन प्रतीक्षमाणा आसन् । परं योगी न स्वात्मानं दर्शयाञ्चक्रे । तावदभ्यन्तरे कश्चन शुनकः पाकशालातः भगवन्निवेदितां होलिकाम् आदाय धावमानः पाचकेन च दण्डेन ताडितः होलिकां भुवि निपात्य कुत्राप्यधावत् । नैतत्सर्वं भक्तजनानां दृग्गोचरं जातम् । सर्वेप्यागता





भक्ताः योगिनः दर्शनमप्राप्तास्सन्तः सखेदमेवे स्वस्वगृहमगच्छन् । आगामिवर्षे तु स्वयं कृष्णाचार्ययोगी कुलकर्णिना क्रियमाणे मध्वनवम्युत्सवे भागमग्रहीत् जनाश्च सन्तोषयामास । केचन योगिवर्यान् पप्रच्छुः "हे योगिन् , किमर्थं वर्षद्वयात् भवान् अस्मदुत्सवं प्रति नागतवानिति ?" तदा भाषमाणः योगिवर्यः "हे मुग्धाः ! अहं प्रथमवर्षे सर्परूपेण, द्वितीयवर्षेपि शुनकरूपेण अवश्यमागतवान् भवद्दत्तनैवेद्यमपि चखाद किन्तु भवतः पाचकः मां दण्डेन ताडितवानित्यतो अधावम्" इति सर्वं यथावद् बभाषे । एवं महात्मानः स्वयोगविद्यया अस्मान् परीक्षितुं विविधरूपाणि स्वीकृत्य समागच्छन्ति अस्मान् अनुगृह्णन्ति च किन्तु वयं तान् परिलक्षयितुम् असमर्थाः भवेम ।

स्वीये **महाराष्ट्र सारस्वता**ख्ये ग्रन्थे भावेमहाभागः कथयति "नाथपथश्च समग्रेपि महाराष्ट्रे द्वादशशतमानादेव ख्यातिमापयत् । नाथपथस्य च प्रभावः यावानासीन्नाम गोविंदपन्थनामकस्य पिता गोरखनाथेन नितरां प्रभावितः क्रि.श.१२०७ तमे वर्षे नाथपथमेव अनुससार" इति । एवं विविधानुसन्धानप्राप्तैः एवमादिविषयैः सुस्पष्टं ज्ञायते यत् नाथपथगाः योगिनः स्वयोगविद्यया न केवलं सच्छक्तिसम्पन्ना आसन् किन्तु लोककल्याणाय सज्जनोद्धरणाय च बह्वयतन्त इति । अद्यापि एतादृशाः योगिनः दृग्गोचरास्सन्ति नेपाल, कर्णाटक, बिहार, बङ्ग, गुर्जर, उत्तरप्रदेश, मरहट्टादिषु भारतदेशेषु ।

मूलतः इमे नाथयोगिनः शिवोपासनया शैवा इति ख्याता आसन् । अस्य च दर्शनस्य पुष्टिस्तावत् तत्रभवता शङ्कराचार्येण दत्ता अद्वैतदर्शनप्रस्तुत्या । किन्तु अद्वैतं केवलं स्वात्मोद्धरणपरकं सन्दृश्य एते योगिनः लोककल्याणमपीच्छन्तः लोके वर्तमानां समस्तशक्तिं योगविद्यया सम्प्राप्य तेन च सज्जनोद्धरणं कर्तुमनसः शक्तिसहितस्य नाथस्य शिवापरनामकस्य परमात्मनः साक्षात्कारमिच्छन्तः नाथाख्यं अपरं पन्थानमेव आरेभिरे इत्यलं पल्लवतल्लजकल्पानल्पजल्पनेन ॥

## सन्दर्भग्रन्थसूची


- Siddha-siddhantapaddhati of Goraksanatha A Treatise on the Natha Philosophy Edited by DR M L GHAROTE, Dr. G K PAI – 2005.
- Karnatakada Nathapantha, Kannada, Rahmath Tarikere – 2013.
- The Vivekadarpana : Scriptural Analysis and Commentary on the Philosophy and the Redemptive Teachings of the Nâthayogîs in Mahârâshtra – 2010.
- The Return of the Serpents of Wisdom, Mark Amaru Pinkham – 1997.
- Natha Sampradaya, Hazari Prasad Dwivedi -1950.
- Masters of Magical Powers : The Nath Yogis in The Light of Esoteric Notions, Gordan Djurdjevic – 2008.
- Appavaru, Ibharamapura, 2018.

# विविधशास्त्रानुसारेण वाक्यलक्षणम्

डॉ सुभाष चन्द्र मीणा[55]

## कुञ्चिशब्दाः

आख्यातः, संघातः, वाक्यस्फोटः, पौर्वापौर्यम्, संहारः, पदप्रकृतिः, पदसमूहः, आसक्ति, कारकान्विता, गामभ्याज, वर्णस्फोटः, गामानयेति

## शोधसारः

विश्वस्य प्रथमं साहित्यं वेदः । वेदस्य संस्कृतभाषारचनामूलकत्वात् प्राचीनतमा भाषा संस्कृतभाषा सर्वास्वपि भूमण्डलभाषासु ऊरीक्रियते भाषाविद्भिः वैज्ञानिकैः । ज्ञानविज्ञानयोः महत्वपूर्णश्च निधिः वैदिकवाङ्मयम् इति सर्वैः प्रतिपाद्यते बुध्यते च । आचार्यो भर्तृहरिः स्फोटाख्यंशब्दतत्त्वमेव ब्रह्मत्वेन उपपादयति " अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् " इति वाक्यपदीयस्थप्रथमकारिकया । यथा ब्रह्मणो विवर्तोऽयं संसारस्तथैव शब्दब्रह्मणः नामरूपाद्यर्थविवर्तः संसारः । वेदश्च शब्दराशिः । प्रमाजनकं प्रमाणमिति प्रमाणलक्षणेन शब्दस्यापि प्रमाजनकत्वमस्ति । भर्तृहरिणा शब्दस्य सामान्येन वाचकत्वमपि विचारितम् । तत्र शब्दस्य वाचकत्वं पदवाक्योभयसाधारण्येन व्यवस्थापितम् । वैयाकरणास्तु सर्वत्र व्यवहारे प्रवृत्तिनिवृत्तिहेतुत्वाद् वाक्यस्यैव प्राधान्यमङ्कुर्वन्ति , यथा " गामानयेति " । वाक्यश्रवणानन्तर मेव मध्यमवृद्धस्य सास्त्रादिमत्पश्वानयने प्रवृत्तिरवलोक्यते । गां माऽनयेति वाक्यश्रवणनिबन्धनैव तस्मात् कार्यात् तस्य निवृत्तिः इति । यद्यपि वर्णस्फोटः , पदस्फोटः , वाक्यस्फोटः , अखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षा सिद्धान्तसिद्धाः , तथापि वाक्यस्फोटातिरिक्तानामन्येषामवास्तवत्वं ध्वनयितुं वाक्यस्फोटस्यैव मुख्यत्वमङ्गीक्रियते । वाक्ये पदानि कल्पितानि पदे च प्रकृतिप्रत्ययभागं प्रकल्प्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थाः कल्पिता एव । वाक्यस्फोट इति कथनेन वाक्यं चासौ स्फोटश्चेति वाक्यस्फोटः , वाक्यरूपः स्फोट इत्यर्थः सम्पद्यते । तत्रोच्यते अर्थबोधनाय प्रयुज्यत इति विग्रहे बच्परिभाषणे इति धातोः कर्मण्यर्थे ॠहलोर्ण्यदिति सूत्रेण ण्यत्प्रत्यये उपधावृद्धौ चजोरिति कुत्वे शब्दस्य संज्ञायां वाक्यमिति रूपं निष्पद्यते । शब्दसंज्ञात्वाभावे " वचोऽशब्दसंज्ञाम् " ( ७.३.६७ ) इति सूत्रेण कुत्वाभावे वाच्यमिति रूपं भवति ।

==================================

ताद्दशस्य वाक्यस्य किं लक्षणमित्येतद्विषये शास्त्रकाराणां नैके मतभेदाः प्रवर्तन्ते । तद्यथा " पदसमूहों वाक्यम् , सुप्तिङन्तचयो वाक्यम्इत्यादीनि । ताद्दशानां मतभेदानां संग्रहाय सिद्धान्ते युक्त्या तत्प्रतिपादनाय च भर्तृहरिर्वाक्यपदीयस्य वाक्यकाण्डमारभते । तत्र नैयायिकादीनां मते पदे वाचकत्वम् , शाब्दिकानां मते वाक्यस्य वाचकत्वमिति सर्वलक्षणसमुच्चयार्थमादौ कारिकया व्याचष्टे , तद्यथा

**" आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।**
**एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः " ।।१**

**" पदमाद्यं पृथक् सर्वं साकांक्षमित्यपि ।**
**वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् " ॥२**

---

55 सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः जयपुर परिसरे



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

" अयमर्थो यद् न्यायवादिनाम् = न्यायो वाक्यविषयकस्तर्कस्तेषां विदुषाम् , वाक्यं प्रति = वाक्यविषये , बहुधा = अष्टधा मतिर्भिन्नेति । ते चाष्टौ विभागा इमे –

१. आख्यातशब्दो वाक्यम् ।
२. संघातो वाक्यम् ।
३. संङ्घातवर्तिनी जातिर्वाक्यम् ।
४. एकोऽनवयवः शब्दो वाक्यम् ।
५. क्रमो वाक्यम् ।
६. बुद्ध्यनुसंहृतिर्वाक्यम् ।
७. आद्यं पदं वाक्यम् ।
८. पृथक् सर्वं पदं वाक्यम् ।

**१. आख्यातशब्दो वाक्यम् –**

यत्रकारकशब्दप्रयोगं विना केवलाख्यातशब्दप्रयोगेऽपि केवलाख्यात शब्दोऽपि वाक्यम् । यथा - पिधेहि इति , वर्षति इति । तत्र पिधेहि इति कर्मप्रयोगाभावेऽपि द्वारमिति कर्माक्षेपात् " द्वारं पिधेहि " इति वाक्यं भवत्येव । एवं ' वर्षति इत्युक्तेऽपि " देवः " इति कर्तुः , जलमिति कर्मण आक्षेपाद् देवो जलं बर्षतीति वाक्यं भवति । तदाह –

**" आख्यातशब्दे नियतं साधनं यत्र गम्यते ।**
**तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते " ॥३**

वाक्यत्ववत् सर्वथा आख्यातशब्दो वाक्यमिति कथनेन आख्यातशब्द एव वाक्यमिति कथनेन सर्वथा आख्यातशब्द एव वाक्यमिति नाभिप्रायः , अन्यथा " देवदत्त गामभ्याज दण्डेन " इत्यादौ सुप्तिङन्तचये सार्वजनीनवाक्यत्वव्यवहारस्यासङ्गत्यापत्तेः । अत एव " आख्यातशब्दो वाक्यम् " इति कथनेन क्वचिदाख्यातशब्दोऽपि वाक्यमित्यभप्रायः । अतो यदुक्तम्- तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते । अत्र " तदप्येकं वाक्यम् " इति कथनेन अन्यदपि वाक्यमस्तीति ध्वन्यते ।

**२. संङ्घातो वाक्यम् -** " संङ्घातो वाक्यम् " इत्यस्य पदसंङ्घातो वाक्यमित्यभिप्रायः एषां मते पिधेहीत्यादी न केवलाख्यातस्य वाक्यत्वम् , अपि तु द्वारमित्यध्याहृत्य तत्संहतस्यैवेति । केवलाख्यातस्य पिधानक्रियायाः अनुपस्थितेः । तदाह –

**" गुणभावेन साकाङ्क्ष तत्र नाम प्रवर्तते ।**
**साध्यत्वेन निमित्तानि क्रियापदमपेक्षते " ।।३ इति ।**

**३. संङ्घातवर्तिनी जातिर्वाक्यम् -** " संङ्घातवर्तिनी जातिर्वाक्यम् " इति वादिनां मते " देवदत्त गामभ्याज दण्डेन " इत्यादिपदसंङ्घाते वाचकत्वं न सम्भवति , तत्र शक्तेरानन्त्यव्यभिचारदोषप्रसङ्गात् । अत एव पदसङ्घातगताया एकस्या जातेरेव वाचकत्वम् , तस्या एव च वाक्यत्वम् । तदाह –

**" यथाक्षेपविशेषेऽपि कर्मभेदो न गृह्यते ।**
**आवृत्तौ व्यञ्जयते जातिः कर्मभिर्भ्रमणादिभिः " ॥४**

वस्तुतस्तु " देवदत्त गामभ्याज दण्डेन " इत्यादिपदसङ्घातरूप वाक्येषु अस्ति कश्चन प्रतिवाक्यं भिद्यमानो जातिविशेषः , येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं भिद्यमानोऽपि " देवदत्त गामभ्याज दण्डेन " इति वाक्य एकत्वप्रतिज्ञा भवति । सा च पदसङ्घातवर्तिनी जातिरेवेति ।

**४. एकोऽनवयवः शब्दो वाक्यम् -** " एकोऽनवयवः शब्दो वाक्यम् " इति केषांचिन्मतम् । एतन्मते वाक्यस्फोटोऽखण्डः । तत्र वर्णपदावापोद्धारकल्पनायामपि वस्तुतो वर्णाः पदानि वा तत्र न सन्तीति । तदाह –

**" यथैक एव सर्वार्थप्रत्ययः प्रविभाज्यते ।**
**दृश्यभेदानुकारेण वाक्यर्थानुगमस्तथा ॥५ इति**

यथा चित्ररूपविषयकमेकं ज्ञानं दृश्यभेदसमाश्रयेण नीलपीताद्यनकाकारमेव विज्ञानमुपजातमिति व्यवह्रियते , तथा वाक्यवाक्यार्थयोरखण्डयोरपि पदभेदार्थभेदयोः व्यवहारः ।

**५. क्रमः वाक्यम् -** " क्रमो वाक्यम् ” इति केषाञ्चिन्मतम् । तन्मते पदानां क्रमः पौर्वापौर्यम् , पूर्वापरीभूतानी पदान्येव वाक्यमिति ज्ञेयम् । “ देवदत्तस्तण्डुलं पचति ” इत्यादौ देवदत्तस्य कर्तृत्वम् , तण्डुलपदार्थस्य कर्मत्वम् , पचतीत्येव क्रिया । एते विशेषा वाक्यार्थीभावात् प्रागपि अनभिव्यक्ताः सन्त्येव । पश्चात् क्रमेण प्रतीतेभ्योऽवगम्यन्त एवेति व्यतिरेकेण शब्दात्मकं वाक्यं नाभिधायकम् , किन्तु क्रम एव वाक्यम् । उक्तञ्च 2

**“ सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः ।**
**ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम् ”६ ।।**

**६. बुद्ध्यनुसंहतिर्वाक्यम् -** अत्र कल्पितानां पदबुद्धीनामनुक्रमेण संहतिः अनुसंहृतिः । अस्मिन् कल्पे वाक्यमखण्डम् । तत्र पदानि न सन्ति । किन्तु पदानि = पदबुद्धयश्च कल्पितानि । तत्र पदबुद्धीनां कल्पितानामनुक्रमेण संहार:= उपसंहार इति पदसमुदायरूपत्वं बुद्ध्या प्रकल्प्य वाक्यत्वव्यवहारः ।

तदाह - **“ यदन्तः शब्दतत्त्वम् तु नादैरेकं प्रकाशितम् ।**
**तदाहुरपरे शब्दं तस्य वाक्ये तथैकता ” ॥७ इति**

**७. आद्यं पदं वाक्यम् -** आद्यं पदं वाक्यमिति केपाञ्चन मतम् । अस्मिन् पक्षेऽनेकपदारब्धं सखण्डं वाक्यम् I अस्मिन् पक्षे प्रथमोपस्थितत्वात् शक्ततावच्छेदकानुपूर्वीकल्पनायां लाघवाच्च आद्यं पदमेव वाचकम् , इतराणि तु तत्सहकारीणि तच्छक्तिद्योतकानि । यथा - " साक्षात् क्रियते ” इत्यत्र साक्षात्पदमेव वाचकम् , क्रियते इति तु पूर्वपदस्य तदर्थे शक्तिद्योतकत्वमित्याद्यपदस्यैव वाक्यत्वमिति । तदाह 2 –

**“ विशेषशब्दाः केषांचित् सामान्यप्रतिरूपकाः ।**
**शब्दान्तराभिसंबन्धात् व्यज्यन्ते प्रतिपत्तृषु ॥ इति**

**८. पृथक् सर्वं पदं साकाङ्क्ष वाक्यम् -** " पृथक् सर्वं पदं साकाङ्क्ष वाक्यम् ” इति वादिनामयमाशयः - पृथक् = वाक्यात् पृथक्कारे , साकाङ्क्षम् = पदान्तरसाकाङ्क्षम् , सर्वम् ” आद्यं मध्यमन्त्यञ्च सुमुदितं वाक्यम् । इत्थं हि अष्टौ वाक्यलक्षणं यथायथं व्याख्यातम् । इत्येतदतिरिक्तमपि वाक्यलक्षणमस्ति । भगवता भर्तृहरिणा स्वोपज्ञवृत्तावुक्तम् - उदाहरणमात्रमेतत् । अन्यान्यपि वाक्यलक्षणानि दर्शयिष्यतीति । तत्र वार्तिककारीयं पारिभाषिकंशास्त्रमात्रोपयोगिवाक्य लक्षणमस्ति । तद्यथा * “ आख्यातं साव्ययकारकंविशेषणं वाक्यम् ”८ । अस्यार्थः अव्ययेन कारकैर्विशेषणेन च सहितमाख्यातं तिङन्तं वाक्यमिति । तद्यथा -मृदु प्रपचति स्थाल्यां तण्डुलमिति । अत्र प्रेत्यव्ययम्।

स्थाल्यामित्यधिकरणकारकम् तण्डुलमिति कर्मकारकम् । मृदु इति आख्यातस्य विशेषणम् । एतच्च साव्यकारकविशेषणं यथासम्भव बोध्यम् , न तु नियतम् ।

द्वितीयम् “ एकतिङ्वाक्यम् ” इत्यपि वार्तिककारीयं शास्त्रमात्रोपयोगिपारिभाषिकं लक्षणमस्ति ।

अस्याभिप्रायः - एकं तिङन्तं यस्मिन् पदकदम्बके



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by **सारस्वत-निकेतनम्**
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
**Since 2010**
**ISSN- 0976-8645**
**UGC RN-41039**

स्यात् तदपि वाक्यं भवति । यथा-गच्छति , पचतीत्यादयः । एतच्च लक्षणं प्रायोऽभिप्रायेण । पचति भवति , पश्य मृगो धावति इत्यादौ यत्रानेकं तिङन्तं “ एकतिङ्वाक्यम् ” तत्र इत्यस्यैकतिङ्विशेष्यकं वाक्यमित्यर्थकरणेन वाक्यत्वं सम्भवति ।

अन्यदपि लौकिकं वाक्यलक्षणं मीमांसकशिरोमणिना जैमिनिना उक्तम् – “ अर्थैकत्वादेकं वाक्यं साकाङ्क्ष चेत् विभागे स्यात् ”९ इति विभागे ततः पृथक्कारे साकाङ्क्षम् तद्धटकपदानां विभागे - पृथक्कृतपदार्थविषये साकाङ्क्ष यदि स्यादिति । अनयोर्द्विविधयोरपि शास्त्रीयलौकिकवाक्यलक्षणयोः पदसङ्घातो वाक्यमिति पक्षेऽन्तर्भावः ।

एतेष्वष्टसु वाक्यविकल्पेषु पक्षद्वयमस्ति - सखण्डवाक्यपक्षोऽखण्ड वाक्यपक्षश्चेति । तत्र मूलं " पदप्रकृतिः संहिता " इति निरुक्तम् । अस्यार्थः -पदानि पदप्रकृतिर्यस्या इति सखण्डपक्षः । तत्र पदमेव शक्तम् । अथवा पदानां प्रकृतिः कारणमित्यखण्डपक्षः समुद्भवति । तत्राखण्डवाक्यलक्षणे त्रीणि लक्षणानि । तानि च इमानि -

१ ) जातिः सङ्घातवर्तिनी ।
२ ) एकोऽनवयवः शब्दः ।
३ ) बुद्ध्यनुसंहतिः ।

सखण्डवाक्यस्फोटलक्षणे पञ्च लक्षणानि ।

१ ) आख्यातः शब्दः ।
२ ) सङ्घातः ।
३ ) क्रमः ।
४ ) आद्यं पदम् ।
५ ) पृथक् सर्व वाक्यम् ।

इत्थं सङ्कलनेन अष्टौ लक्षणानि जातानि । सूक्ष्मेक्षिकया विचारे स्फोटो द्विविधः- 1. बाह्यः , 2. आभ्यन्तरश्चेति । तत्राद्यः परश्रवण गोचरः । आभ्यन्तरस्तु मनोमात्रगोचरः । बायोऽपि जातिव्यक्तिभेदेन द्विविधः । तत्र जातिलक्षणस्य स्फोटस्य “ जातिः सङ्घातवर्तिनी इति लक्षणम् । व्यक्तिलक्षणस्य तु " एकोऽनवयवः शब्दः " इति निर्देशः । आभ्यन्तरस्तु बुद्ध्यनुसंहृतिरिति लक्षणम् । तंत्र पञ्चसु सखण्डवाक्यलक्षणेषु सङ्घात -क्रम इति लक्षणद्वयेऽभिहितान्वयवादः । पातशब्दः पदमाद्यम् , पदं सर्वं साकाङ्क्षमिति लक्षणत्रयेऽन्विताभिधानवादः । अभिहितान्वयवादे पदमेव शक्तं न तु वाक्यम् । वाक्यार्थभूतः पदानां संसर्गस्तु आकाङ्क्षाभास्यः। आकाङ्क्षा च तत्तच्छाब्दबोधं प्रति नियतः पदानां समभिव्याहारविशेषः । अभिहितयोःशक्त्योपस्थितयोः पदार्थयोरन्वय । आकाङ्क्षाभास्यः इत्यभिहितान्वयवादिनामभिप्रायः ।

अन्विताभिधानवादिनां पदानां शक्तिरित्यन्वयरूपः आकाङ्क्षाभास्य मते कार्यान्विते इतरपदार्थान्विते वा स्वार्थे संसर्गोऽपि शक्तिभास्य एव । तादात्म्यादिरूपः तत्रान्वयत्वेनान्वयसामान्यं शक्तिभाष्यम् , सम्बन्धविशेषस्तु लक्षणया लभ्यत इति । तदुक्तम्

**“ सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ।**
**भाट्टास्तेऽपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम् ” ||**

इत्थं वाक्यपदीयारेण अष्टधावाक्यलक्षणं प्रस्तूतं , तथाप्यर्थबोधजनकस्य वाक्यस्य लक्षणं भिन्नभिन्नप्रकारेण कृतम् । न केवलवैयाकरणाः किन्तु नैयायिकाः , मीमांसकाः आलङ्कारिकास्तथा अन्येऽपि अत्र केचन विचाराः संक्षिप्य प्रस्तूयन्ते ।

**“ सुप्तिङन्तचयो वाक्यम् क्रिया वा कारकान्विता । ”**

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

१०

कौटिल्यः अपि स्वकीये अर्थशास्त्रेवाक्यलक्षणं कुर्वन् वदति – - “ **पदसमूहो वाक्यर्थसमाप्तौ शक्तम्** ” ११

- नैयायिकाभिमतं वाक्यलक्षणम् - नैयायिकेषु गङ्गेशः स्वकीये तत्त्वचिन्तामणो वाक्यलक्षणं प्रसतुवन् वदति - वाक्यत्वं विशिष्टार्थपरशब्दत्त्वम् इति । जगदीशभट्टाचार्यः शब्दशक्तिप्रकाशिकायाः स्वोपज्ञवृत्तौ वाक्यस्वरूपं प्रतिपादयन् वदति- “ याद्दशशब्दानां याद्दशार्थविषयिताकान्वयबोधं प्रति अनुकूला परस्पराकाङ्क्षा ताद्दशशब्दस्तोम एव तथाविधार्थे वाक्यम् ” । “ स्वार्थबोधः समाप्तः पदसमूहः वाक्यम् ११” इति तस्याभिमतम् ।

मीमासंकाभिमतं वाक्यलक्षणम् “ समभिहारो वाक्यम् ” इति मीमासंकाभिमतं वाक्यलक्षणं बहुधा स्वीकृतमस्ति । एतस्य एव लक्षणस्य पल्लवनं परवर्तिभिः मीमांसाचार्यै : त्रिधा कृतं द्दश्यते ।

तद्यथा -1) अङ्गत्वघटकीभूतपरोद्येश्यत्व - कृति पदार्थबोधकपदकल्पनानुकूलश्रुतपदसन्निधिः स घटकीभूतकरणत्वकर्मत्वान्यतरविषयकशक्त्यजन्यशाब्द कारकत्वान्यतर चाङ्गत्व बोधानुकूलपदसमभिव्याहारो वाक्यम् ।

2 ) अङ्गत्वघटक- परस्पर- पदार्थसंसर्गवृत्ति शक्त्यप्रयोज्य -विषयताक- शाब्दबोधानुकूल - पदसमभिव्याहारो वाक्यम् ।

3 ) तदर्थश्चाङ्गत्वघटकीभूतं यत्करणत्वं कर्मत्वं वा समभिव्याहारो तदन्यतरविषयताको यः शक्त्यजन्यबोधस्तदनुकूलः वाक्यम् इति ।

मीमांसासूत्रकारो जैमिनि : “ अवशिष्टस्तु वाक्यार्थः ”१२ इति वाक्यस्वरूपं प्रतिपादयति । लोके वेदे च वाक्यार्थः समानः एव भवति इत्युपर्युक्तस्य सूत्रस्य तात्पर्यम् ।

वेदान्तशाखाभिमतं वाक्यलक्षणम् श्रीसदानन्दः वेदान्तसारस्य महावाक्यार्थप्रकरणे वाक्यस्वरूपमेवमुपस्थापयति१३ –

**“ संसर्गो वा विशिष्टो वा वाक्यार्थो नामसम्मतः ।**
**अखण्डैकरसत्वेन वाक्यर्थो विदुषां मतः ” १४।।**

आलङ्कारिकाभिमतं वाक्यलक्षणम् विश्वनाथकविराजेन साहित्यदर्पणे वाक्यलक्षणं सुष्ठु प्रतिपादितमस्ति । तस्य मतानुसारं योग्यता - आकाङ्क्षा - आसत्तियुक्तः पदसमूह एव वाक्यं भवति ।

**“ वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ।१५ ”** ।

**वैयाकरणाभिमतं वाक्यलक्षणम्** - एकतिङन्तार्थ - मुख्यविशेष्यक - बोधजनक - पदसमूहो वाक्यम् इति सर्वसम्मतं वैयाकरणाभिमतं वाक्यलक्षणम् । पदसंघातजं वाक्यम् इति संग्रहकारेण व्याडिना , संग्रहे प्रतिपादितमासीत् किन्तु तल्लौकिकलक्षणं मन्यते । वार्तिककार : कात्यायनः । “ एकतिङ्वाक्यम् १७” इति वार्तिकमुखेन शास्त्रीयवाक्यलक्षणं प्रस्तौति यस्य पल्लवनं विवेचनञ्च परवर्तिनि काले पतञ्जलि - प्रभृतिभिः कृतं द्दश्यते ।

उपर्युक्तस्य वार्तिकस्य व्याख्यां प्रस्तुवन् भाष्यकार : पतञ्जलिः कथयति एकतिङ्वाक्यसंज्ञं भवतीति वक्तव्यम् । आख्यातं सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम् । साव्ययम् इत्येतेन सुष्ठु पचति , सुष्ठु पचति , उच्चैः पठतीत्यादीनां वाक्यत्वं सिद्ध्यति । एवमेव उच्चैः पठति इत्यस्यापि । सकारकम् इति कथनेन ओदनं पचति इत्यस्य तथा सकारकविशेषणम्



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

इत्यनेन मृदु विशदमोदनं पचति इत्यस्य च वाक्यत्वं सिद्ध्यति ।

अत्र साव्ययकारकविशेषणमिति लक्षणानुसारं प्रत्येकं वाक्यं भवति समुदितं वा वाक्यमित्यत्र नियमो नास्ति । यद्यपि अव्ययस्यापि कारकत्वं विशेषणत्वञ्च सिद्ध्यति तथापि तस्य पृथक् प्रतिपादनं स्पष्टार्थमेव ।सक्रियाविशेषणञ्च वक्तव्यमिति यत् पतञ्जलिना उक्तं तत्र प्रत्यासत्त्या कारकस्यैव यद् विशेषणं तद् गृह्यते न तु क्रियायाः ।

आख्यातपदेन च क्रियाप्राधान्यं लक्ष्यते । तेन ' देवदत्तेन पठितव्य ' मित्यादौ वाक्यत्वं सिद्ध्यति । सविशेषणमित्यत्र साक्षात्परम्परया वा यद् विशेषणं तत्सहितमित्यर्थः बोध्यः । एवं सति " नद्यास्तिष्ठ कूले " इत्यादौ नद्याः इत्यादेः समानवाक्यत्वं सिद्ध्यति । एतदेव लक्षीकृत्य अमरकोशे अमरसिंहेनकारकान्वित - क्रियावाचकस्य वा वाक्यत्वं प्रतिपादितम् । कारकञ्च तिङन्तवाच्यं तदतिरिक्तवाच्यं वेति नास्ति कश्चन आग्रहः ।

एतदेव एकोद्देश्यक - एकविधेयत्वगर्भम् एकवाक्यलक्षणं वाक्यपदीयकारेण भर्तृहरिणा अधोलिखितायां वाक्यपदीय कारिकायां सुष्ठु प्रतिपादितम् ' ।

**“ साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।**
**क्रियाप्रधानं गुणवदेकार्थं वाच्यमुच्यते ” १८।।**

अत्र कारिकायामुल्लिखितं वर्तते यद् वाक्यपदम् एकवाक्य बोधकम् । अत एव उद्देश्यानेकत्वे विधेयानेकत्वे च वाक्यभेदे सति अर्थकत्वादेकं वाक्यं साकाङ्क्ष चेद् विभागे स्यादिति जैमिनिसूत्रमपि संगच्छते ।

वाक्यलक्षणप्रयुक्तम् आख्यातपदमधिकृत्य नागेशकैयटयोः मतानैक्यं वर्तते । कैयटस्तु आख्यातमित्यत्र एकत्वविवक्षणात् पचतिभवतीत्यादौ द्वित्वप्रसङ्गे ‘ तिङ्ङिङः ' इत्ययेन निघातं न अमुमनूते । उक्तं च तेन प्रदीपे “ आख्यातमिति चैकत्वं विवक्ष्यते लक्षणविधानसामर्थ्यात् " पचतिभवतीत्यादौ सत्यपि साध्यसाधनभावे आख्यातयोर्द्वित्वात् समानवाक्यत्वाभावात् निघातप्रसङ्गात् ।

नागेशस्तु उपर्युक्तकैयटमतं दोषयुक्तं मत्वा तत् खण्डयन् वदति आख्यातमित्यत्र एकत्वस्य विवक्षणे सति व्यक्तिपक्षे ' न ब्राह्मणं हन्याद् ' इत्यादौ एक ब्राह्मणम् अहत्वा कृती स्यादिति भाष्योक्तन्यायेन एकस्यैव आख्यातस्य वाक्यत्वं स्यात् न तु आख्यातान्तरस्येति ।

काशिकाकाराभ्यां जयादित्यवामनाभ्यामपि काशिकायामनेकार्थः ‘ पदसमूहो वाक्यम् ”१९ इति वाक्यलक्षणम् प्रस्तुतम् ।

एतत्प्रकारेण वाक्यस्य विविध शास्त्रानुसारम् अर्थं वर्तते ।

## अन्तटिप्पणी

१. वाक्यपदीयम्-२.१
२. वाक्यपदीयम्-२.२
३. वाक्यपदीयम्-२.३२६
४. वाक्यपदीयम्-२.४८
५. वाक्यपदीयम्-२.२०
६. वाक्यपदीयम्-२.७
७. वाक्यपदीयम्-२.४९
८. महाभाष्यम्-२.१.१
९. जैमिनिसूत्रम्-२.१.४६
१०. अमरकोषः-१.६.२
११. अर्थसंग्रहः-१८९
१२. शब्दशक्तिप्रकाशिका-१३

Since 2010
ISSN- 0976-8645
UGC RN-41039

१३. मीमांसासूत्रम्-१.२.४०
१४. वेदान्तसार-
१५. साहित्यदर्पण:-२.१
१६. पाणिनिसूत्रम्-२.१.१
१७. महाभाष्यम्-२.१.१
१८. वाक्यपदीयम्-२.४
१९. काशिका-८.१.८

## सन्दर्भग्रन्थसूची


- वाक्यपदीयम्-२.१, श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय, वाराणसी, पृष्ठ-१
- वाक्यपदीयम्-२.२, श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय वाराणसी, पृष्ठ-२
- वाक्यपदीयम्-२.३२६, श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय वाराणसी, पृष्ठ-३९७
- वाक्यपदीयम्-२.४८,श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय वाराणसी, पृष्ठ-९४
- वाक्यपदीयम्-२.२०, श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय वाराणसी, पृष्ठ-९७
- वाक्यपदीयम्-२.७, श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय वाराणसी, पृष्ठ-२७
- वाक्यपदीयम्-२.४९, श्रीरघुनाथशर्मा, सम्पूर्णानंद-संस्कृत-विश्वविद्यालय वाराणसी, पृष्ठ-९५
- महाभाष्यम्-२.१.१, चौखम्भा कृष्णदास अकादमी, वाराणसी, पृष्ठ-६३
- जैमिनिसूत्रम्-२.१.४६ ,श्रीबद्रीनारायणशास्त्री, सुरभि प्रकाशन, दिल्ली, पृ-१०३
- अमरकोष:-१.६.२ , डॉ कृष्णमोहन, भारती पब्लिकेशन, लखनऊ


# परोपकार का प्रतीक : गौ माता

**डॉ० विवेक शर्मा**[56]

## कुञ्चिशब्द

गौवंश, गौ, माता, परोपरकार, परोपकारी जीव, तत्पर, घास फूस, तृण, उत्पादन, सहिष्णु, पोषण, रक्षा, दूध, भूमि

## शोधसार

सर्वप्रथम परोपकार शब्द को समझें तो इसका सामान्यार्थ है, अपनी आवश्यकताओं की पूर्ति के लिये न्यूनातिन्यून प्राप्त करना एवं दूसरों के हित के लिये अपना सर्वस्व न्योछावर करना । अत्यन्त सरल जीवन जीते हुये अन्यों के लिये उपयोगी बनाना और अपनी व्यक्तिगत उन्नति के लिये परिश्रम करने के स्थान पर दूसरों के सुगम जीवन के लिये ही प्रयासरत रहना परोपकार है और इस तरह का जीवन जीने वाला परोपकारी कहलाता है । परोपकार की इस उक्त परिभाषा के आधार पर गौ माता अग्रगण्य है।
वस्तुतः गाय सरलता, नम्रता, स्नेह, धैर्य, सहिष्णुता, सादगी एवं परोपकार का एक प्रत्यक्ष अवतार है। इसलिये हमारे समस्त शास्त्रों में गौ की उदात्त महिमा का वर्णन किया गया है । वस्तुतः पृथिवी पर असंख्य जीव निवास करते हैं, किन्तु हमारी सनातन परम्परा में गाय की ही महिमा को मुक्त कण्ठ से गाया गया है । इसका सबसे बड़ा एवं प्रमुख कोई कारण है तो वह है - गोवंश का मनुष्यों के प्रति परोपकारी व्यवहार । गौ एवं पृथ्वी दोनों समरूपक ही हैं क्योंकि शास्त्रों में दोनों

[56] सहायकाचार्य, संस्कृत विभाग हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला




Since 2010
ISSN- 0976-8645
UGC RN-41039

को ही 'गो' शब्द से व्यवहृत किया गया है[57] । वेदों में पृथ्वी और गौ को 'मही' शब्द के व्यवहृत किया गया है । अतः इन दोनों में अभिन्नता है । जिस प्रकार पृथ्वी पर रहते हुये मनुष्यों के मल मूत्रादि के त्याग आदि कुत्सित आचरणों को पृथ्वी माता सप्रेम सहन करती है, उसी प्रकार गौमाता भी मनुष्यों के जीवन का आधार होती हैं, तद्यथा 'गावः प्रतिष्ठा भूतानाम्[58]' इत्यादि शास्त्रों में कहा गया है ।

गौ एक माता, पिता तथा सन्तान के समान सभी मनुष्यों की रक्षा करती है, अतः ऋग्वेद में इसे माता, पिता एवं पुत्र कहकर सम्बोधित किया गया है[59] । मनुष्यों के वाहन, पालन दायित्व, निरोध एवं ताड़न आदि को सहन करती है, जैसा कि गौ के विषय में महाभारत में कहा गया है –

**धारयन्ति प्रजाश्चेमा हविषा पयसा तथा**[60] ।

इस लिये गौ और पृथ्वी से अधिक क्षमावान और कोई नहीं हो सकता है ।

गायें महान् तेजोमयी और समस्त प्राणियों को सुख देने वाली हैं । पद्मपुराण के सृष्टिखण्ड में स्पष्ट रूप से कहा गया है कि ब्रह्मा ने सभी के पोषण के लिये गौओं को उत्पन्न किया –

**अस्य कायो मया सृष्टः परैव पोषणं प्रति ।**

अतः शास्त्रों की मान्यता है कि न केवल इह लोक में अपितु परलोक में भी गाय हमारा कल्याण करती है, जैसा कि अथर्ववेद के एक मन्त्र में उल्लेख किया गया है कि मृत्यु के बाद भी मनुष्य के अन्धकारमय मार्गों में गौ साथ देती है अर्थात् प्रकाश प्रदान करती है[61] । जब हम पशु – समुदाय को आहार, निद्रा, भय एवं मैथुन का विशेष्य मात्र स्वीकार करते हैं तो हमारे अन्तश्चक्षु सम्भवतः इस तथ्य से अनभिज्ञ रहते हैं कि जो त्याग एवं निःस्वार्थ सेवा की भावना मनुष्यों में वर्षों की तपस्या के उपरान्त बहुत कठिनता से आती है, वह त्याग भावना गोधन में सहज भाव से विद्यमान रहती है । गाय केवल हिन्दुओं की ही नहीं अपितु सम्पूर्ण मानव सभ्यता का पोषण करती है । गोधन के परोपकार की बात करें तो इस विषय में जितना वर्णन किया जाये वह कम ही होगा । यथा इससे अधिक गौमाता की दयालुता क्या हो सकती है कि वह सूखे तृण भक्षण करके जीवन भर मानव समाज को दुग्ध, घृत जैसे पौष्टिक द्रव्य प्रदान करती है । गाय अनन्त काल से मानव जाति को पोषण हेतु दूध प्रदान करती आ रही हैं । गोस्वामी तुलसीदास ने स्पष्ट रूप से लिखा है कि त्रेतायुग में गायें मनचाहा दूध देती थीं –

**लता बिटप माँगे मधु चवहीं । मनभावतो धेनु पय स्रवहीं ।।**
**ससि सम्पन्न सदा रह धरनी । त्रेताँ भइ कृतजुग कै करनी**[62] ।।

[57] गोशब्देनोदिता पृथ्वी सा हि माता शरीरिणाम् । शैशवे जननी माता पश्चात् पृथ्वी हि शस्यते ।। ; गोरिति पृथिव्या नामधेयम् । निरुक्तम्, ०२/०१/०१

[58] महाभारतम्, अनुशासनपर्व, ८१/१२ ; श्रीमद्भागवतपुराणम्, ०२/०३/१०

[59] अदितिर्माता स पिता स पुत्रः । ऋग्वेदः, ०१/८९/१०

[60] महाभारतम्, अनुशासनपर्व, ८१/०२-०३

[61] अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यान्विद्युद्भवन्ती प्रति वव्रिमौहता ।। अथर्ववेदः, ०९/१०/०७

[62] रामचरितमानस, ०७/२३/५-६

चावल, गेहूँ मानव खाता है, जबकि गाय भूसा खाती है एवं दाल स्वयं खाकर मानव गाय को छिलका खिलाता है । फिर भी इसके बदले वह कई उपयोगी वस्तुयें प्रदान करती है । आज के समय में विज्ञान ने कई तरह के अविष्कार कर लिये हैं, किन्तु विज्ञान ने अभी तक कोई ऐसा यत्र नहीं बनाया है, जिसमें एक तरफ से भूसा अथवा खली डाली जाये और दूसरी तरफ से दूध निकलता हो । इस तरह के आश्चर्यजनक कार्य करने में विज्ञान जहाँ अक्षम रहता है, वही इस कार्य को गौ माता नित्य प्रति करती रहती है । जो अनुपयोगी पदार्थों का सेवन कर अमृत-तुल्य पदार्थ हमें सुलभ करवाती है । सामान्य रूप से चिन्तन करें तो यदि हम किसी यत्र को उसकी आवश्यकतानुरूप पदार्थ प्रदान न करें तो वह रूक जाता है । वाहन में पर्याप्त मात्रा में इंजन ऑयल न डाला जाये तो इंजन रुक जाता है । टायर में कम हवा हो तो टायर फट जाता है । कूलेंट कम हो तो गाड़ी ओवर हीट होकर रुक जाती है । किन्तु गाय के लिये गर्मी सर्दी की कोई बाध्यता नहीं होती उसको भोजन पानी कम भी मिले फिर भी वह दूध देना बन्द नहीं करती है । कार्यक्षमता के अनुसार ही केवल गाय अधिक उपयोगी नहीं है अपितु कई अन्य भी कारण हैं, जो गाय को यन्त्रों से श्रेष्ठ सिद्ध करते हैं । उसमें भी एक अन्य महत्त्वपूर्ण पहलू है कि गाय में चेतनता है, जिसकी कल्पना यन्त्रों में नहीं की जा सकती है । गाय भूखी रहेगी किन्तु उपकार के मार्ग से च्युत नहीं होगी ।

परोपकार की यह पराकाष्ठा ही है कि सूखे एवं मानव के लिये निरर्थक पत्तों की टोकरी को उसके आगे जब डाल दिया जाता है तो वह इसे बदले में दूध की बाल्टी भर कर प्रदान कर देती है । अतः गाय मानव सभ्यता के लिये सजीवित कौतुक (biological wonderment) अथवा चमत्कार है ।

परोपकार की दृष्टि से गौ माता का महत्त्व अपनी जननी से भी अधिक है । अपनी माता तो ज्यादा से ज्यादा दो वर्षों तक अपनी सन्तान को दूध पिलाती है, किन्तु गौमाता तो आजीवन अपनी मृत्युपर्यन्त दूध पिलाती है तथा जो मातृविहीन बालक होते हैं, उन्हें दूध पिलाने के दायित्व का निर्वहन तो गौ माता ही करती है । गाय अपने शरीर को निचोड़कर अपने बछड़े आदि की भी उपेक्षा कर हमें पौष्टिकता प्रदान करती है । इस प्रकार यह जननी से बढ़कर त्याग करती है, यह सर्वथा परोपकार की मूर्ति है । जिस कारण से गौ माता के परोपकार की महिमा अनन्त है । इसलिये गुरुदयालीमल जी ने कहा है –

**जननी जनकर दूध पिलाती केवल साल – छमाही भर ।**

**गोमाता पय – सुधा पिलाकर रक्षा करती जीवनभर ।।**

वस्तुतः माँ का एकमात्र उद्देश्य बच्चे का हित करना होता है । उसके जीवन के प्रत्येक क्षण में उसका यह चिन्तन रहता है कि किस प्रकार से उसकी सन्तान स्वस्थ, सुखी एवं श्रेष्ठ बने । इसी भावना से ओतप्रोत गाय को देख कर ऐसा लगता है कि गाय ने एक माँ के रूप में अपने दायित्वों का निर्वहन करने के लिये ही अपना अस्तित्व प्राप्त किया है । ऐसा भी प्रतीत होता है कि गाय का अस्तित्व प्राप्त करना मानव जाति के हित में ही है । इसी कारण से वर्ड्सवर्थ, टाल्स्टाय, मिलो जैसे कई विदेशी लेखकों ने अपने लेखों में गाय को



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

"दूध पिलाने वाली माँ" कहा है[63] ।

इस सरल एवं निष्कपटी गौ माता का दूध शिशु पालन हेतु दुहते समय हम यह भूल जाते हैं कि इस माँ की अपनी सन्तति भी परिपालन की अपेक्षा करती होगी । फिर भी करुणामयी, परोपकार की साक्षात् मूर्ति वह गौ माता अपने वत्स की उपेक्षा करते हुये भी बिना किसी सङ्कोच के अमृतमयी दुग्ध धारा से हमें पूर्णतः आप्लावित कर देती है और दूध से हमारा पात्र भर देती है । कितना महान् त्याग है । यह पूर्ण स्वाभाविक परोपकार का भाव है । इसी कारण से यजुर्वेद में कहा गया है कि सम्पूर्ण संसार में गौओं के तुल्य अन्य वस्तु नहीं है[64] अर्थात् इनकी तुलना किसी से भी नहीं की जा सकती है ।

गौएँ कृषि द्वारा अन्न को उत्पन्न करवाकर मनुष्यों का पालन पोषण उसी प्रकार करती है, जैसे एक माँ अपने बच्चों की देख रेख, भरण पोषण करती हैं । इसी कारण से गौओं को माता कहकर सम्बोधित किया गया है –

**गावो विश्वस्य मातरः**[65] ।

**मातरः सर्वभूतानां गावः सर्वसुखप्रदा**[66] ।

**सरूपा बहुरूपाश्च विश्वरूपाश्च मातरः**[67] ।

महाभारत में गौ से प्रार्थना की गई है कि वह अपने बच्चे के समान माँ बनकर हमें आश्रय प्रदान करे[68] ।

गौ माता के परोपकारी भाव को व्यक्त करते हुये महाभारत के अनुशासन पर्व में कहा गया है –

**धारयन्ति प्रजाश्चैव पयसा हविषा तथा, एतासां**
**तन्याश्चापि कृषियोगमुपासते ।।**
**जनयन्ति च धान्यानि बीजानि विविधानि च, ततो**
**यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः**[69] **।। अमृतायतं**
**चैताः सर्वलोकनमस्कृताः**[70] **।।**

अर्थात् गौएँ अपने दूध – घी से प्रजा का पालन पोषण करती है । इनकी सन्ताने कृषि का कार्य करके नाना प्रकार के धान्य उत्पन्न करती हैं । गौओं से ही यज्ञ सम्पन्न होते हैं एवं हव्य कव्य का पूर्ण निर्वाह होता है । इन अमृत के आधारभूत प्रतीकों को सारा संसार प्रणाम करता है । गौएँ समस्त संसार को ऊर्जा प्रदान करती हैं, अथर्ववेद में कहा गया है कि इनके स्तनों में साधारण दूध नहीं होता अपितु इसके स्तनों से ऊर्जामय रस का दोहन होता है[71] ।

गौओं के विषय में अथर्ववेद में कहा गया है कि ये मानव समाज के सौभाग्य में वृद्धि करती हैं[72] । गौओं के दर्शन करने मात्र से बलवान सन्तान प्राप्त होती है[73] । गौओं के विषय में महाभारत में कहा गया है कि ये

---

63 गो अङ्क, गीताप्रेसगोरखपुर, संवत् २०७६, पृष्ठः १९५

64 गोस्तु मात्रा न विद्यते । यजुर्वेदः, २३/४८

65 विष्णुधर्मोत्तरपुराणम्, ०३/४३/०३

66 महाभारतम्, अनुशासनपर्व, दानधर्मपर्व, ६९/०७

67 महाभारतम्, अनुशासनपर्वः, दानधर्मपर्वः, ८१/३२ ; महाभारतम्, अनुशासनपर्वः, दानधर्मपर्वः, ८०/१२

68 आत्मानं मे मातृवच्चाश्रयन्तु ।। महाभारतम्, अनुशासनपर्वः, दानधर्मपर्वः, ७६/११

69 महाभारतम्, अनुशासनपर्व, दानधर्मपर्व, ८३/१८-१९ ; महाभारतम्, अनुशासनपर्व, दानधर्मपर्व, ५१/३०

70 महाभारतम्, अनुशासनपर्व, दानधर्मपर्व, ५१/३०

71 यावस्याः स्तनौ सहस्रधारारावक्षितौ ।
ऊर्जं दुह्यते अनपस्फुरन्तौ । अथर्ववेदः, ०९/०१/०१/०७

72 सा वर्धतां महते सौभगाय । अथर्ववेदः, ०९/१०/०५

73 वीरं विदेय तव देवि सद्दशि । शुक्लयजुर्वेदः, ०४/२३

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by **सारस्वत-निकेतनम्**
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

महान् तेजोमयी तथा सभी को सुख प्रदान करने वाली हैं[74] । गौएँ मनुष्य को सुख-सम्पत्ति, आनन्द, यश, कीर्ति तथा अनेक वस्तुओं को प्राप्त करवाती हैं । सम्पूर्ण समाज के लिये गौ किसी वरदान के कम नहीं, क्योंकि गाय से ही सभी लोग अपना जीवन निर्वाह एवं भरण पोषण करते हैं । गौ माता मानव सभ्यता के लिये अनन्त उपकार करने वाली है । गौ समाज के लिये बहुत लाभप्रद है इसलिये वैदिक काल से ही गौ का विशेष ध्यान रखा गया है । गौ इसी लोक की ही नहीं, अपितु समस्त लोकों की रक्षा एवं पोषण करने वाली है, जिस कारण से सभी देव, पितर, मनुष्य, गन्धर्व और अप्सराओं से गौ माता पूजित है[75] । गौ मनुष्य को दूध, घी और मधुर पदार्थों को प्रदान करने वाली है । गौरस तथा अन्य गव्य पदार्थों का वर्णन करते हुये कहा गया है कि यह कृश को पुष्ट और तेज हीन को सौन्दर्ययुक्त बनाते हैं[76] । गौ मानव जीवन के लिये नितान्त उपयोगी प्राणी है, जिस कारण अथर्ववेद में निर्देशित किया गया है कि प्रत्येक घर में गौएँ दुही जायें एवं यज्ञार्थ गौओं के दूध का उपयोग किया जाये[77] । वस्तुतः साहित्य एवं व्यवहार में मनुष्य की सज्जनता की उपमा गाय की नैसर्गिक सरलता से दिया जाना एक सामान्य बात है । इसलिये गाँव देहात में अत्यन्त सरल, कौमल एवं सुकुमार व्यक्ति के लिये कहा जाता है कि **"वह तो निरा गौ है"** । यह पशु नहीं परोपकार का उत्कृष्ट प्रतीक एवं मान्दण्ड है, इसलिये कहा गया है – **परोपकाराय दुहन्ति गावः** ।

यह तो निश्चित हो गया कि गौएँ मानव सभ्यता के लिये पूर्ण रूप से परोपकारी हैं एवं यह भी सिद्ध हो गया है कि भगवान् ने गाय को लोक – कल्याण के लिये ही बनाया है । गाय सदा सभी का हित चाहती है । ऐसा लगता है कि भगवान् ने गाय को परोपकार का अलौकिक आशीर्वाद प्रदान किया है । गौ अपने सम्पूर्ण जीवन में हमारे द्वारा दिये गये रूखे सूखे घास अथवा भूसे को खाकर हमें अमृत प्रदान करती है, खेती एवं माल ढुलाई हेतु हमारे लिये सहोदर समान बछड़ों को प्रदान करने के साथ साथ औषध रूप गोमय एवं गोमूत्र प्रदान करती है । वह अपना निर्वाह अत्यन्त साधारण भोजन से करती है । खुले मैदानों अथवा जंगलों में जो अत्यन्त तुच्छ घास अपने आप ही बिना किसी प्रयास से उत्पन्न हो जाती है, ऐसे घास का मात्र सेवन कर गाय प्रफुल्लित हो जाती है । वह अपने जीवन निर्वाह के लिये किसी को भी कष्ट नहीं देती है और न ही अपने अस्तित्व को बचाये रखने के लिये किसी से स्पर्धा करती है । वह इस संसार में कम से कम ग्रहण करके उसके प्रत्युत्तर में दुग्ध, दहीं, पनीर इत्यादि आश्चर्यजनक वस्तुयें प्रदान करती है । गाय केवल दूध और उससे रूपान्तरित किये गये पदार्थों से ही मानव जाति की सेवा नहीं करती वरं उसका सर्वस्व जीवन सेवा कार्य हेतु सन्नद्ध रहता है । गाय ने इस संसार में सेवा का उच्चतम आदर्श प्रस्तुत किया है ।

---

74 गावो ही सुमहत्तेजः प्राणिनां च सुखप्रदाः । महाभारतम्, अनुशासनपर्व, ५१/३१

75 देवाः पितरो मनुष्याः गन्धर्वाप्सरसश्च ये । अथर्ववेदः, १०/०९/०९

76 यूयं गावो मेदयथा कृशं चिदश्रीरंचित् कृणुथा सुप्रतीकम् । अथर्ववेदः, ०४/०५/०१/०६

77 समद्धो अग्निरश्विना तप्तो वां धर्म आ गतम् ।
दुह्यन्ते नूनं वृषणेह धेनवो दस्ता मदन्ति वेधसः । अथर्ववेदः, ०७/७३/०२



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by **सारस्वत-निकेतनम्**
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

गाय के इसी परोपकारी भावना पर महात्मा बुद्ध भी मुग्ध थे । गाय की परोपकारमयी निर्दोषता को प्रकट करते हुये उन्होने कहा है कि -

**न पादा न विसाणेन नास्सु हिस्सन्ति केनचि ।**
**गावो एलक समाना सोरता कुम्भदूहना**[78] ।।

*विष्णुसहस्रनामभाष्ये* पाराशरभट्टेन सात्त्वतशब्दो भागवतस्य पर्यायरूपेण स्वीकृतः। तत्रोक्तम् -" सातयति सुखयति आश्रितानिति सातः परमात्मा, स एषामस्तीति वा सात्त्वताः सात्त्वन्तो वा महाभागवताः इति। "[10] *जयाख्यसंहितायां* वैष्णवानां भेदरूपेण कर्मसात्त्वतानामुल्लेखो विधीयते। तत्र स्पष्टतयोक्तम्-

" मुख्यत्वेन क्रियार्थं यः कुटुम्बस्य च पालने।
आत्मनो भरणे चापि इत्युक्तश्चोपसर्पति।
वृत्यर्थमपि राजानं स विप्रः कर्मसात्त्वतः॥ इति।" [11]

अस्यां संहितायामाप्तलक्षणनिर्णये शुद्धे भगवन्मार्गे सत्त्वस्थजन सात्त्वत इति कथ्यते। *ईश्वरसंहितायां* ( 1/68) व्यवहतानि 'सात्त्वततनतूमोत्तमम्' सात्त्वतार्थोपपादकमिति मतानि आगमेषु विवृतस्य साधनवर्त्मनः अभिज्ञानानि। आगमशास्त्रपाठादवगम्यते सात्त्वतमतरूपेण केषाञ्चित् गुणानां व्यवहारः परिलक्ष्यते। यदि वासुदेवेन प्रचारितस्य भागवतधर्मस्य नामान्तरं सात्त्वत भवति तर्हि नैतिकसदाचाराणां संमिश्रणं भवति धर्मेऽस्मिन् ।समाजे स्त्रीभूतेषु मानवसंघेषु नैतिकगुणानामाधारतया सात्त्वतमत्स्य प्राधान्यं वरीवर्धते ।यादवानां मध्ये विकशितं धर्ममतमिदं समाजे सर्वस्तरे विस्तृतिमलभत। यतो ब्राह्मण्यसंस्कृतौ सात्त्वतमत्स्य ग्रहणं पाञ्चरात्रसंहितानां पाठादवगम्यते ।पाञ्चरात्रशास्त्रेषु सात्त्वतसंहितायामुच्चदार्शनिकतत्त्वानां विवेचनमस्ति।

**धर्मार्थे विचारार्थे च सात्त्वतपदस्य व्यवहारः**

सात्त्वतजातिभिः परिगृहीतो धर्मो सात्त्वतो नाम्नाभिधीयते। अपि तु सात्त्वतधर्माश्रिताः जनाः संज्ञया अनया परिचीयन्ते। प्राचीननारायणीयधर्मस्य विवेचनं वैयासिक्यां शतसाहस्रीसंहितायां नारायणीये मोक्षधर्मे पूर्णतया विहितम्। भागवतधर्मस्य दार्शनिकभावसम्मतं तत्त्वं तत्रालोच्यते। महामतियुधिष्ठिरस्य प्रश्नस्योत्तरे पितामहभीष्मो नारायणभक्तस्य राज्ञः उपरिचरवसोः प्रसङ्गमाख्यातवान् यः सात्त्वतविधिमवलम्ब्य देवेशं पूजयामास। तदाह-

" सात्त्वतं विधिमास्थाय प्राक् सूर्यमुखनिःसृतम्।
पूजयामास देवेशं तच्छेषेण पितामहान्॥ " इति। [12]

श्लोकस्यास्याभिमुखद्वयः परिलक्षितः। अत्रोपरिचरवसः सूर्योपदिष्टसात्त्वतविधिना नारायणं पूजितवान् ।अनेन सात्त्वतधर्मे सूर्योपासनायाः प्रभाव आसीदित्यनुमीयते ।यदि भागवतधर्मस्य नामान्तरं सात्त्वतधर्मो भवेत्तर्हि तत्र प्राचीनसूर्योपासनाया गभीरप्रभाव आपतत्येव। वैदिकार्यानामादित्यचेतना खलु भागवतधर्मस्य प्राणभूता ।अस्यामेव चेतनायामुत्तरणं भागवतजनानां परमाकांक्षितलक्ष्यम्। अस्माकं कृषिप्रधाने देशे प्राणस्वरूप खलु सूर्यः ।अतोऽस्माकं धर्मसाधनायामपि तस्य प्रकाशो वर्तते। सात्त्वतधर्मस्य साधनधारायामस्या आदित्यपासनायाः प्रभावो न वयं विस्मरामः। उपरिचरस्य वृत्तान्तात् अपरविषय एकोऽवगम्यते। सात्त्वतविधिरनेन पदेन धर्मोऽयम् भगवद्भक्तेनावलम्बितमार्गविशेष इत्यनुमीयते ।टीकाकारेण सात्त्वतविधेर्व्याख्यायामुवाच-

" सत्त्वगुणस्थितानामयमिति सात्त्वतस्तम्, विधिः विधानम् आस्थाय अवलम्ब्य देवेशं नारायणं





पूजयामास।"13अत्र सत्त्वगुणस्याधारः सात्त्वतपदवाच्य इति दृश्यते। उपरिचरवसुः इमं सात्त्वतविधिमाश्रित्य एकाग्रचित्तेन काम्यनैमिकानि यज्ञकर्माणि सम्पादितवान्। भारतसंहितायां वैश्मपायनेन नारायणात्मकानामेकान्तिनां धर्म सात्त्वतधर्मतया व्याचक्ष्यते। धर्मपुत्राय धीमते दुश्चरोधर्मः व्यासेन व्रुते। धर्मस्य माहात्म्यमुद्गीयते वैश्मपायनेन-

" एष धर्मो जगन्नाथात् साक्षान्नारायणान् नृपः।
एवमेष महान् धर्म आद्यो राजन्! सनातनः।
दुर्विज्ञेयो दुष्करश्च सात्त्वतैर्धार्यते सदा॥ इति।" [14]

अत्र स्पष्टतयावगम्यते सत्त्वगुणसम्पन्नो जनो धर्मस्यास्य प्रकृतधारक एव। नारायणीयमोक्षधर्मे सात्त्वतपदं सत्त्वगुणमयमित्यर्थे बहुलतया निष्पादितम्। नारायणमुखात् समुद्भूतो धर्मोऽयमादौ ब्रह्मणा संगृह्य कृतयुगे यथाविधिः स्थापितम्। यतः कृतयुगे सर्वलोकान् व्याप्य सात्त्वतधर्म एवावस्थितः। धर्मोऽयमेकान्तधर्मतया गुरुभिर्व्याचष्टे। नारायणपरसत्त्वगुणसम्पन्नधर्म एव सात्त्वतधर्मः।

**सात्त्वतमत्स्य प्रचारकत्वेन गृहीतस्य वासुदेवस्य माहात्म्यम्**

सात्त्वतसम्प्रदायस्यैतिहासिकविचारलब्धगवेषणायां दृश्यते ययातेर्वंशे सात्त्वतानामाविर्भावोऽभवत् ।वासुदेवकृष्णः सात्त्वतगोष्ठीभुक्त आसीत् ।यद्यपि ऐतिहासिकानां मध्ये गवेषकानां मध्ये च भगवतोर्वासुदेवकृष्णस्य गोपालकृष्णस्य च रूपद्वयं प्रसङ्गे वैमत्यं दृष्टम् ।महाकाव्ये पुराणेषु च वासुदेवकृष्णस्य रूपवैचित्रं लभ्यते ।यथा वैयासिक्यां *शतसाहस्रीसंहिताया*मुपस्थापितो वासुदेवश्रीकृष्णः भारतयुद्धस्याह्वायकः , श्रीमद्भगवद्गीतायाः प्रवक्ता श्रीकृष्ण इतिहासपुराणानां श्रीकृष्णश्च ।न वयं विस्मराम वृष्णिकूलद्भवस्य वासुदेवकृष्णस्य जीवनचर्चायां परिलब्धस्य ज्ञानस्य प्रकाशो श्रीमद्भागवद्गीतायां परिलभ्यते। तदपि ज्ञानमिदं सात्त्वतमत्स्य रूपमेकमिति कथितुं शक्यते ।वासुदेवकृष्ण ऐतिहासिकपुरुषः राजनीतिकुशलो योगेश्वरपुरुषविशेषः ।भागवतमतस्योत सात्त्वतमत्स्य प्रचारकोऽयं दैवीसत्तायामुत्तीर्णोऽभवत् ।*विष्णुपुराणोक्तस्य* भगवान् शब्दस्य निरुक्तौ ऐश्वर्यादिगुणानामन्तर्भावो भवति ।तत्रोक्तम्-

" एवमेष महाशब्दो भगवानिति सत्तम।
परमब्रह्मभूतस्य वासुदेवस्य नान्यतः॥" इति। [15]

वैष्णवागमेषु नारायणो वासुदेवरूपेण संपूज्यते ।किन्तु काव्यशास्त्रादिपाठादवगम्यते पुराणाश्रिताया वासुदेवकृष्णस्य सत्ताया महाभारतस्य भगवत कृष्णस्य सत्तायाश्च पारस्परिकस्वातन्त्रमस्ति ।देवदेववासुदेवोऽयं वृन्दावनस्य गोपसमाजे शिशुः किशोरतया चोपासितासीत्। उत्तरकाले हस्तिनापुरस्य राजपरिवारेषु विष्णुरूपिणो भगवतो वासुदेव-कृष्णस्योपासनाया धारा विकाशयति। यद्यपि वैदिकसाहित्ये ब्राह्मणसाहित्ये च वासुदेवस्योल्लेखो नोपलभ्यते ।किन्तु तैत्तिरीयारण्यकस्य दशमप्रपाठके 'नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ' इति मन्त्रे वासुदेवेन सह परमपुरषनारायणस्य आदित्यविष्णोश्च एकीभवनं संजातमिति मन्यन्ते ऐतिहासिकाः ।ड.कीथमहाभागस्य नये आरण्यकस्य समय खलु ख्रि.पू तृतीयशतकमिति। [16] अतः कालस्यास्य मध्ये विष्णु-वासुदेवयोरैक्यं

प्रतिष्ठितमित्यनुमीयते ।ख्रि.पूर्वपञ्चमशतकस्य पाणिनेरष्ट्याध्यायात् वासुदेवार्जुनाभ्यां वुन् इति सूत्रात् ज्ञायते समाजे वासुदेवस्याराधना प्रचलितासीदिति ।वासुदेवस्य सर्वव्याप्तसत्ताया अवधारणं वासुदेवपदस्य निर्वचनादुपलभ्यते ।वसुदेवस्यापत्यमित्यस्मिन् अर्थे ऋष्यन्धकवृष्णिकुरुभ्यश्च इति सूत्रेण उण् प्रत्ययो भवति ।पुनश्च सर्वत्रासौ वसत्यात्मरूपेण विश्वम्भरत्वादित्यर्थे वस्धातोर्वाहुलकात् उण् प्रत्ययोगेन वासुः। वासुश्चासौ देवश्चेति इत्यनेन कर्मधारयो समासोऽत्र भवति।*विष्णुपुराणे* वासुदेवपदस्य निर्वचनात् तस्य सर्वव्याप्तसत्त्यायाः परिचयः प्राप्तः। त्तत्रोक्तम्-

सर्व्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेषु च सर्वात्मा वासुदेवस्ततः स्मृतः ॥इति। [17]

शतसाहस्त्रीसंहितायाः संकलनसमये वासुदेवस्य महिमा प्रतिष्ठितं जायते। तत्र भगवता विष्णुना सह परमपुरुषेण नारायणेन च सह वासुदेवस्यैकात्मता दृष्टिगोचरी जाता। अस्याः संहिताया उद्योगपर्वणि सर्वव्यापिनो वासुदेवस्य एकात्मता विष्णुना सह व्याख्यायते ।तत्रोक्तम्-

" वसनात् सर्वभूतानां वसुत्वाद् देवयोनितः।
वासुदेवोस्ततो वेद्यो बृहत्वात् विष्णुरुच्यते॥ " इति। [18]

एतेभ्यो श्लोकेभ्योऽनुमीयते एतेषां पर्वानां संकलनसमये वासुदेवस्य देवसत्ता पूर्णरूपेण प्रतिष्ठिता जायते।*श्रीमद्भागवतगीतायां* ( 10/37) वृष्णीनां वासुदेवोऽस्मि इत्यस्मिन् श्लोके वृष्णीनां मध्ये वासुदेवो वसुदेवस्य पुत्रतया ख्यातः।अनेन तस्य मानवसत्तायाः परिचयो लभ्यते। आर्.जि.भाण्डारकारमहाभागस्य विषयेऽस्मिन् वैमत्यं विद्यते। स काशिकामनुसृत्य प्रमाणीकर्त्तुं चेष्टयते एतत्-" Here Āniruddha means the son of Aniruddha, and therefore Vāsudeva must mean the son of Vāsudeva not of Vasudeva, as will appear from what given as a Dvanda of royal Vṛṣṇi names each of them being in the plural and Saṃkarṣaṇa-Vāsudevau as a Dvanda of royal Vṛṣṇi names.'' इति। [19]

महाकाव्यपुराणानां तथ्यालोकेन यदि विचार्यते तर्हि वृष्णिकूलस्य वासुदेवसंकर्षनानिरुद्धयः सात्त्वतवंशजा आसन्। यादव-सात्त्वत-वृष्णिकूले जातस्य क्षत्रियवीरस्य समरनिपुणस्य शास्त्रेषु कृतविद्यस्य लब्धयशसो वासुदेवस्य चरित्रस्य दार्ढ्यं माहात्म्यञ्च तं परमब्रह्मणोऽवताररूपेण संसारेऽस्मिन् प्रतिष्ठापयति ।अतुलनीयधीयुक्तस्य प्राज्ञविचक्षणस्य वासुदेवस्य महिमा शनैः शनैः जनेषु प्रतिष्ठितं जायते स्म ।यदि सूक्ष्मरूपेण विचार्यते तर्हि वासुदेवस्य सत्तायां सर्वव्यापिनो चैत्यन्यस्य स्वरूपं क्रमेण स्फुटीभवति ।यतो *श्रीमद्भगवद्गीतायामुक्तम्-*

" बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥" इति। [20]

क्रमेण वार्ष्णेयवासुदेवेन प्रतिष्ठितं मतं समाजे सात्त्वतधर्मरूपेणाथवा भागवतधर्मरूपेण प्रतिष्ठामलभत। प्राचीनभारतीयेतिहासस्य लब्धकीर्तिः प्राध्यापकः हेमचन्द्ररायचौधुरीमहाभागो मन्यते-

" ...the Bhāgavata religion the parent of modern Vaishṇavism arose in Mathurā region and that its founder was a scion of the Vṛṣṇi or Sātvata branch of the Yādava class and a disciple of the Ṛiṣi Ghora Āńgirasa a priest of the Sun.'' इति। [21] यदि ऐतिहासिकदृष्ट्यां विचार्यते तर्हि ज्ञायते भागवतधर्मस्य विस्तारे मथुरा तथा प्राचीनशुरसेन इत्यञ्चलस्य गुरुत्वमासीत् ।कुइन्टास-कार्टियास-स्ट्रावो-डिओडोरास्-आरियान् प्रमुखानां ग्रीकलेखकानां रचनासु उल्लिखितायाः मेगास्थिनिसस्य रचनायाः ज्ञायते





शौरसेनया इत्यभिधेया जना हेराक्लेश इति देवतां समादरं कुर्वन्ति। गवेषकानां नये वृष्णि-अन्धक-सात्त्वतजनाः खलु शौरसेनय इति पदवाच्याः ये तु हेराक्लिस् इति देवतां पूजितवन्तः ।मथुरा तथा शुरसेन इति अञ्चले यादवा अतिष्ठन् ।वासुदेवश्रीकृष्ण यादवसात्त्वतगोष्ठ्यान्तर्भूक्त आसीत्।

**सात्त्वतधर्मसम्बन्धितं किञ्चित् तथ्यम्**

वासुदेवकृष्णो यदा भगवत्सत्तायामुत्तीर्णोऽभवत् तदा स्वगोष्ठीमध्ये अर्थात् सात्त्वतानां मध्ये तस्य भगवत्ता पूर्णतया प्रतिष्ठिता जायते स्म।*श्रीमद्भागवते* तदाह-

" यद् तद् ब्रह्म सूक्ष्ममशून्यं शून्यकल्पितम्।
भगवान् वासुदेवेति यं गृणन्ति सात्त्वताः॥ " इति। [22]

कालप्रवाहेन वासुदेवस्य सत्तायां भगवतो विष्णोः परमचैतन्यमयपुरुषस्य नारायणस्य च सत्तायाः संमिश्रंणमभवत् तदा धर्मेऽस्मिन् दर्शनतत्त्वस्म्बलितस्य मत्स्य विकाशः परिलक्ष्यते ।सात्त्वतधर्मो नारायणीयधर्मत्वेन गृह्यते ।नारायणस्य माहात्म्यं संयुक्तत्वात् एषोऽयं धर्मः नारायणपरधर्मतया कथ्यते। सात्त्विकपुरुष एव नारायणमवाप्नोति। तथा चोक्तम्-

" नारायणपरो मोक्षस्ततो वै सात्त्विकः स्मृतः।" इति। [23]

अपि तु

"जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकस्तु स विज्ञेयो भवेन्मोक्षेषु निश्चितः॥" इति। [24]

अत्र वैश्मपायनेन कथितः नारायणीयधर्म एव सात्त्वतधर्म इति मन्ये। एकान्तसेवितः सांख्ययोगेन तुल्यो धर्मोऽयं नारायणात्मकधर्मो यं एकान्तभक्तः सात्त्विकजनो एव सेवितुमर्हति ।सात्त्वतधर्मस्य मूलदार्शनिकतत्वं सम्भवतया याथार्थ्येण श्लोकेनानेन प्रतिपाद्यते-

" सुसूक्ष्मं सत्त्वसंयुक्तं संयुक्तं त्रिभिरक्षरैः।
पुरुषः पुरुषं गच्छेन्निष्क्रियः पञ्चविंशकः॥ " इति। [25]

प्राचीनसांख्यदर्शनस्य प्रभावोऽत्रोपलभ्यते। चिन्मयत्वात् अतीव सुसूक्ष्मं सत्त्वादिगुणयुक्तमकारोकारमकारैः संयुक्तं प्रणवस्वरूपं सत्त्वगूणयुक्तं पुरुषमेवाधिगच्छेयुः सात्त्विकजनाः। पाञ्चरात्रादिशास्त्रेषु च एषो नारायणधर्मः पूर्णरूपेण विकाशयति ।अयमेव हि सात्त्वतधर्मः ।अत्र न किमपि अनुष्ठानवाहुल्यं तथा सम्प्रदायगततत्त्वस्य विवेचनं क्रियते। किन्तु प्राचीनतमेषु सांख्यादिदर्शनप्रस्थानेषु निगमागमेषु च परब्रह्मणो यदेव स्वरूपमाम्नातं तस्य स्वरूपस्य सूक्ष्मप्रपञ्चनं कालविवर्तने सात्त्वतधर्मे दृश्यते। महाभारते कृष्णः सत्त्वधर्मात् न कदापि विच्युतं भवति अतः स सात्त्वतः खलु। तेन प्रचारितो धर्मोऽपि सात्त्वतधर्म इति कथितुं शक्यते। हरिवंशे कथ्यते सत्त्ववृत्तिगुणोपेतात् सत्त्वत इति यादवनृपात् सात्त्वतानामाविर्भावः। प्राचीनभारतीयशास्त्रेषु सत्त्वगुणादेव सात्विकपदस्योत्पत्तिर्वर्णिता।

पाञ्चरात्रागमेषु *जयाख्यसंहितायां* सात्त्वतानां वैशिष्ट्यप्रसङ्गे एवमाह-

"द्विजातीनां चतुर्णां तु अधिकारं ददत्यपि।
शुद्धे तु भगवन्मार्गे सत्त्वस्थास्सात्त्वताश्च ते॥" इति [26]

**सात्त्वतमत्स्य प्राचीनत्वम्**

सात्त्वतमत्स्य प्राचीनत्वं गवेषणया प्रमाणीभवति। *ऐतरेयब्राह्मणे शतपथब्राह्मणे* च सत्त्वतपदस्य प्रयोगत्वात् मतस्यास्य प्राचीनत्वं स्वतसिद्धमेव। यदि ख्रिस्टपूर्वं नवमशतकं शतपथब्राह्मणस्य कालरूपेण विवेच्यते तर्हि तदा मतमिदं विकाशमाप्नुवाना तिष्ठतीति

Since 2010
ISSN- 0976-8645
UGC RN-41039

मन्ये।प्राचीनसात्त्वतमतस्योल्लेखो महाभारतस्य नारायणीये मोक्षधर्मे दृष्टः।यद्यपि पर्व इदं द्विविधेन संलापवचनेन संबद्धम्। महाभारतस्य संकलनकालो नैवेको समये स्थिरीकृतः। यदि ख्रिस्टपूर्वचतुर्दशशतकं वासुदेवकृष्णस्य कालतया निरूप्यते तर्हि तस्मादेव समयात् मतमिदं यादवान् प्रभावयतीत्यशयो मम। सात्त्वतमत्स्य कालपरिगणनायां वासुदेवस्य कालनिर्णय आवश्यकः।किन्तु विषयेऽस्मिन् विबुधेषु वैमत्यमस्ति।अध्यापककल्याणकुमारगङ्गोपाध्यायमहा भागो *विष्णुपुराणस्य* प्रमाणानुसारं ख्रिस्टपूर्वाब्दः 1407 शतकं परीक्षितस्य जन्मकालरूपेण विवेच्यते। [27] रविकीर्तेः आइहोलशिलालेखात् भारतयुद्धस्य समयकाल ख्रिस्टपूर्व 3102 शतकमेव इति ज्ञायते। तदा वासुदेव-श्रीकृष्ण वर्तते स्म इति भावनाया अवकाशोऽस्ति। अनिर्वाणमहाभागो मन्यते नारायणीयधर्मस्य तथा सात्त्वतधर्मस्याधियज्ञरूपं *शतपथब्राह्मणे* विध्रियते। यस्य समयकालः सम्भवतया ख्रिस्टपूर्वाष्टमशतकमेव। धर्मस्यास्य चतुर्व्यूहवादे नारायणो वासुदेवो भवति। यतो नारायणीयधर्मस्य विशिष्टप्रचारकः वासुदेवः। [28]पाणिनिव्याकरणानुसारं वासुदेवार्जुनाभ्यां बुन् ( 4/3/93) इति सूत्रेण वासुदेवार्जुनयोः भक्तिरित्यस्मिन्नर्थे वासुदेवार्जुनाभ्यां वुन् प्रत्ययो भवति।सूत्रस्यास्योपरि रचितेभ्यो भाष्यवचनटीकाप्रभृतिभ्यः संज्ञायते पाणिनेः समयकाले वासुदेवस्य देवत्वं प्रतिष्ठितमासीत्।नारायणीयमोक्षधर्मस्य संकलनकाले चेदिराज-उपरिचरवसोर्माहात्म्यं ज्ञायते।सूर्योपसकात् सात्त्वतनृपादस्मात् वासुदेवसम्प्रदायस्य प्रतिष्ठापि भवितुमर्हति। वासुदेवपूजायाः ऐतिह्यं वैयाकरणैः स्वीकृतमेव। आचार्यपतञ्जलेः समयकालो यदि ख्रिस्टपूर्वद्वितीयशतके स्थिरीक्रियते तर्हि तस्माद् पूर्वादेव कालात् वासुदेवपूजायाः प्राधान्यं समाजे प्रतिष्ठितमभवदिति स्पष्टरूपेण प्रतीयते।

बौद्धसाहित्यस्य *चुल्लनिद्देशात्* वसुदेवपूजकानां वासुदेवानामुल्लेखो लभ्यते।यस्याधारेणास्य सम्प्रदायस्यावस्थानं ख्रिस्टपूर्वतृतीये चतुर्थशतके च आसीदित्यनुमीयते। [29]अभिलेखप्रमाणादपि वासुदेवस्याराधनाया कालोऽवगम्यते।ख्रिस्टपूर्वद्वितीयशतकस्य भागवतधर्मस्य उदाहरणरूपेण गृहीतसय हेलिओदोरस्य प्रस्तरमयाद् वेस्नगर इत्याख्यादभिलेखात् ज्ञायते योणदूतः हेलिओदोरः देवदेववासुदेवस्य कृते स्तम्भमेकमुच्छ्रितवान् । [30] ख्रिस्टियप्रथमशतकस्य नानेघाट इत्यभिधेये गुहाभिलेखे संकर्षण-वासुदेवयोरुल्लेखो लभ्यते। समकालीने घोषुण्डी इत्यभिधेये शिलालेखे संकर्षण-वासुदेवयोः कृते देवायतननिर्मानस्योल्लेखो विधीयते।अतः समयस्यास्य मध्ये वासुदेवस्याराधनाया प्रचलनेन सह च सात्त्वतमत्स्य व्याप्तिः समाजे पूर्णरूपेण विस्तृत अभवत्।

**सात्त्वतधर्मस्याचार्यपरम्परा**

*श्रीभारतसंहितायां* वैयासिक्यां शान्तिपर्वणि मोक्षधर्मे सात्त्वतधर्मस्याचार्यपरम्परा निगदिता सन्ति। पुरा जिज्ञासितः सन् शान्तनु वृत्तान्तमिदं कथितवान्। पितृवचनमनुसृत्य महामतिभीष्मः तदेव वृत्तान्तं युधिष्ठिराय निवेदितवान्। मरीच्यत्रङ्गिरपुलहपुलस्तक्रतुवशिष्टश्चेति सप्तचित्रशिखण्डिनो नारायणसकाशात् तत्त्वमेतत् अलभन्तेति।तेभ्य एव सात्त्वतशास्त्रमभ्युपगम्यते।



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by **सारस्वत-निकेतनम्**
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

सूर्यस्य मुखात् निःसृततत्त्वमिदमुपरिचरवसुः वृहस्पतिसकाशात् प्राप्नोति।

**सात्त्वतधर्मस्य मूलतत्त्वञ्च**

यदि वासुदेवतत्त्वं सात्त्वतमत्स्य बीजमतं भवेत्तर्हि तस्य सूचनं सुप्राचीनमेव।भागवत-सात्त्वत-पाञ्चरात्र इत्यादिभिराख्यातस्य धर्मस्य मूलतत्त्वं वासुदेवोपासनमिति।पर-व्यूह-विभव-अर्चा-अन्तर्यामीरूपेण भगवतपञ्चविधरूपवैचित्रं भागवतधर्मस्याथवा सात्त्वतमतस्यागमप्रस्थानानाम् विषयवैचित्रमस्मासु प्रतिभाति।अस्य मतस्यागमप्रस्थाने ज्ञान-योग-क्रिया-चर्याख्यानां चतुर्णां विषयानामन्तर्भावो भवति। तत्र ज्ञाने जीवब्रह्मणोः रहस्योद्घाटनं योगे मुक्तिसाधकानां कर्मणां क्रियायां देवालयमूर्तिनिर्माणं चर्चायां षाड्गुण्यविशिष्टानां देवानाञ्च विवेचनमस्ति।किन्तु सात्त्वत इति संहितायां ज्ञान-योग—क्रिया-चर्चात्मकस्य पादचतुष्टयस्य वर्णना नास्ति।परमब्रह्मणः स्वरूपमत्र त्रिविधोपायेनालोच्यते।तत्रोक्तं-

षाड्गुण्यविग्रहं देवं भास्वज्ज्वलनतेजसम्।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्॥
परमेतत् समाख्यातमेकं सर्वाश्रयं प्रभुम्।” [31] इति

अयं षाड्गुण्यमयदेवो हि भगवान्। यस्य उपासका एव भागवताः।सात्त्वतमते पर-व्यूह-विभवैः परमब्रह्मणः स्वरूपं निरूपितम्। तत्र परब्रह्मणो दशाद्वयं वर्तते। सततोदितया दशया अथवा नित्योदितया दशया युक्तः परवासुदेवः शान्तोदितया च दशाया युक्तो व्युहवासुदेवः।परवासुदेवे षाड्गुण्यादयः स्तिमितरूपेण व्यूहवासुदेवे चैते प्रबुद्धरूपेणावतिष्ठन्ते।परवासुदेवं व्यूहवासुदेवञ्चाधिकृत्य समाजे भगवतरूपासनायाः फल्गुधारा निरनरं प्रवाहमानासिदिति सात्त्वनामितिहासपर्यालोचनाद् ज्ञायते।

सात्त्वतधर्मे विष्णुनारायणवासुदेवसत्तानां संमिश्रणविषये तुषामशिलालेखे भगवतोः विष्णोः प्रीत्यर्थं निर्मितस्य देवस्थानस्य प्रतिष्ठातुः पितामहस्य वर्णनायां सात्त्वत-योगाचार्य इति पदस्य प्रयोगोऽस्ति यस्मादुपलभ्यते कालस्यास्य मध्ये सात्त्वतानां साधनमार्गस्य निर्दिष्टा धारा एका प्रस्तुयते।लेखस्यास्य समयः प्राक्गुप्तकालीन इति कथितुं शक्यते।वाकाटकवंशजस्य द्वितीयरूद्रसेनस्य माण्डालताम्रपत्रे सात्त्वतचरणाश्रिताय दम्पतये शेषशायिन आज्ञानुसारं ग्राममेकं प्रदानस्य तथ्यं सन्निहितमस्ति। [32]अत्र व्यवहृतेन सात्त्वतचरणाश्रयीति पदेन वासुदेवकृष्णः खलु सात्त्वतपतीत्यवगम्यते। वासुदेवकृष्णेनोद्गीतस्य सात्त्वतमत्स्य विवर्तनक्रमे परमपुरुषनारायणस्य तत्त्वं कथं धर्मेऽस्मिन् संलीनं जायते स्मेति अभिलेखादस्मादुपलभ्यते।

कालस्य विवर्तनचक्रे भगवता वासुदेवेनोद्गीतस्य सात्त्वतधर्मस्य दर्शनचिन्तायां विविधपरिवर्तनं संजातम्। *श्रीमद्भगवत्गीतायां* यथा तस्य रूपमेकं विधृतमागमशास्त्रादिषु चास्य दर्शनमतसमुहानि सन्निहितान्यासन् इति कथितु शक्यते। एतदपि सत्यं सात्त्वतमत्स्य मध्ये भारतीयदर्शनप्रस्थानानां विशेषतः सांख्य-योगो-वेदान्तमतानां समाहारो दृश्यते।

**अन्तटिप्पणी**

1.आर्.जि.भाण्डारक, *वैष्णभिजम् शैभिजम् एण्ड माइनर् रिलिजियास् सिस्टेमस्* ,पृ. 8 ।
2. *हरिवंशम्* 1/37/1।
3. *विष्णुपुराणम्* 4/13/1।
4. *भागवतपुराणम्* 10/46/34।
5. *अहिर्बुध्नसंहिता* 54/5।
6. बलदेव उपाध्याय, *भागवत सम्प्रदाय*, पृ. 103।

Since 2010
ISSN- 0976-8645
UGC RN-41039

7. *महाभारतम्* 12/325/98।
8. नगेन्द्रनाथ वसु, *विश्वकोष*, खण्डम्.21. पृ.416.
9. *महाभारतम्* 12/321/25। तत्र भारतकौमुदीटीका द्रष्टव्या।
10. सुधाकर मालवीय , *सात्त्वत संहिता* ,पृ.16।
11. *जयाख्यसंहिता* 22/15-16।
12. *महाभारतम्* 12/321/20।
13. तत्रैव भारतकौमुदीटीका द्रष्टव्या।
14. *महाभारतम्* 12/332/55।
15. *विष्णुपुराणम्* 6/5/76
16. सुधाकर मालवीय. तदेव. पृ.14।
17. *विष्णुपुराणम्* 6/5/80।
18. *महाभारतम्* 5/70/3।
19. आर्.जि.भाण्डारकर, *तदेव* पृ. 8 ।
20. *श्रीमद्भगवद्गीता* 7/19।
21. एइच्.सि.रायचौधुरी, *एलिमेन्ट्स् अव् आर्लि हिस्ट्रि अव् वैष्णवसेक्ट्स्*, पृ.89.
22. *श्रीमद्भागवतपुराणम्* 9/9/49।
23. *महाभारतम्* 12/332/70।
24. *महाभारतम्* 12/332/73।
25. *महाभारतम्* 12/332/80
26. *जयाख्यसंहिता* 22/29।
27. कल्याणकुमार गङ्गोपाध्याय ,*भारतसंस्कृतिते भगवान् श्रीकृष्ण* ,पृ.216।
28.अनिर्वाण, *साहित्य प्रसङ्ग* ,पृ.46।
29. सुधाकर मालवीय, तदेव, पृ. 17।
30. डि.सि.सरकार ,*सिलेक्ट इन्स्क्रिप्सनस्* ,पृ. 5-7.
31. *सात्त्वतसंहिता* 1/25-26।
32. कल्याणकुमार गङ्गोपाध्याय, *तदेव* , पृ. 390-391।

## सन्दर्भग्रन्थसूची

*Ahirbudhnya Saṃhitā*.Ed. M.D.Ramanujacharya. Madras: The Adyar Libraryand research Centre, 1966.
*Anirvan*. Sāhitya Prasanga. Kolkata: Banglar Mukh Prakashan, 2013.
*Bhāgavata Purāna*. Vol.I & II Ed. Hanuman Prasad Poddar. Gorakhpura: Gita press 2002.
Bhandarkar, R.G. *Vaiṣṇavism Śaivism and Minor Religious Systems*. New Delhi: Munshiram Manoharlal Pvt.Ltd , 2001( 3rd Ed.).
Gangopadhyaya, Kalyan Kumara. *Bhāratasamaskritite Bhagavan Kṛṣṇa*. Kolkata: Sahityaloka, 1989.
*Harivaṃśa*. Ed. Ramnarayana Dutt. Gorakhpur: Gita Press, 2014.
*Jayākhya Saṃhitā*. Ed.Embar Krishnamacharya. Baroda: Oriental Institute, 1931.
*Mahābhārata*. Vol.5 & 37Ed. Haridāsa-Siddhantavagīśa- Bhaṭṭācārya, with Beng.trans and own Sans,Comm.Bhāratakaumudī, together with Nīlakaṇṭha's comm. Bhāratabhāvadīpa. Kolkata: Biswabani Prakashani, 1400 BY. ( 2nd ed.; 1st ed.1345 BY)
Raychaudhuri, Hemchandra. *Meterials for the Study of The Early History of the Vaisnava Sect*.Calcutta( Now Kolkata): University of Calcutta, 1936.
*Sāttvata Saṃitā*. Ed. Ācāryaśrī Vrajavallabha Dwivedī. Varanasi: Sampurnananda Sanskrit University, 2001.
*Sāttvata Saṃhitā* Ed.Sudhakara Malaviya. Varanasi: Chowkhamba Sanskrit Series, 2007.
Sircar, D.C. *Select InscriptionsBearing on Indian History and Civilization*, Vol.I : *from the sixth century B.C to the Sixth Century A.D.* Calcutta (Now Kolkata), University of Calcutta, 1942.
*ŚrĪmadbhagvadgītā*. Ed. Svami Jagadisvarananda. Kolkata: Udbodhana Karyalaya, 2009.
Upadhyaya Baladeva. *Bhāgavata Sampradāya*. Kasi: Hindu Visvavidyalaya, 2010.
*Viṣṇu Purāṇa*. Ed. Pancanana Tarkaratna, with Beng.Trans. Kolkata: Nabhabharat Publishers, 1422 (BY) (1st ed 1390)
*Viśva Koṣa* Ed. Nagendranath Basu. Kolkata: Published By Nagendranath Basu, 1317(BY).




Since 2010
ISSN- 0976-8645
UGC RN-41039

# शिक्षा और संवेगात्मक बुद्धि

विजय कुमार झा[122]

## कुञ्चिशब्द

समाज, संवेगात्मक बुद्धि, मापन, सम्प्रत्यय

## शोधसार

हमारे समाज में विभिन्न शारीरिक संरचना, स्वभाव, धर्म, जाति, व्यक्ति तथा अन्य अनेक गुणों में भिन्नता के साथ-साथ बुद्धि में भी विभिन्नता वाले व्यक्तित्व होते हैं। कोई व्यक्ति तीव्र बुद्धि का तो कोई मंद बुद्धि का एवं कुछ सामान्य बुद्धि के भी लोग होते हैं। इसके अतिरिक्त की बुद्धि को प्रखर, प्रतिभाशाली, जड़ एवं मूर्ख आदि पक्षों में विभाजित करके परिभाषित किया गया है। वास्तव में अभी तक बुद्धि की कोई स्पष्ट परिभाषा सामने नहीं है। सभी मनोवैज्ञानिक एवं शिक्षाशास्त्रियों ने अपने-अपने अनुसार बुद्धि के सम्प्रत्यय को समझा है।

================================

प्रज्ञा[123] के विभिन्न प्रकार में एक "संवेगात्मक बुद्धि" का एक नूतन सम्प्रत्यय सामने आया है। इसमें व्यक्ति के सकारात्मक एवं नकारात्मक संवेगों को बुद्धि का हिस्सा बताया गया है। जिसमें प्रत्येक व्यक्ति अपनी आवश्यकताओं, परिस्थितियों तथा लक्ष्यों को दृष्टिगत रखते हुए उसके समक्ष उत्पन्न होने वाली विभिन्न घटनाओं के प्रति विभिन्न प्रकार की संवेगात्मक प्रतिक्रियाएँ प्रस्तुत करता है। सवेगात्मक बुद्धि के कारण ही व्यक्ति अपने ज्ञान, समझ, कौशल, अनुप्रयोग आदि के द्वारा स्वयं पर सांवेगिक नियंत्रण रखने तथा स्वयं को विपरीत परिस्थितियों में भी समायोजन करने का प्रयास करता है । सकारात्मक संवेग व्यक्ति को सुसमायोजन की ओर ले जाता है । वहीं नकारात्मक संवेग कुसमायोजन की ओर ले जाता है। संवेदनात्मक बुद्धि का उल्लेख सर्वप्रथम अरस्तू के द्वारा 350 ईसा पूर्व में ही कर दिया गया था लेकिन तब यह शब्द प्रचलित नहीं हो पायाथा। यद्यपि संवेगात्मक बुद्धि शब्द का प्रयोग बेल्डोच (Beldoch) के द्वारा 1964 ई. में तथा ल्यूनर (Leuner) के द्वारा 1966 ई. में करने के संदर्भ मिलते हैं ।कहीं-कहीं मिलता है कि संवेगात्मक बुद्धि शब्द का प्रयोग सबसे पहले सन् 1985 में वाइने पेइनी (Wayne Payne) के द्वारा अपने शोध प्रबन्ध A study of Emotion Developing Emotional intelligence[124] में किया गया था। इसके उपरांत सन् 1989 ई. में पीटर सेलवे (Peter salovey) तथा जॉन मेयर (jonmayer) के द्वारा संवेगात्मक बुद्धि के सम्प्रत्यय को आगे बढ़ाया तथा इसके मापन हेतु सन् 1990 में एक परीक्षण भी बनाया। परन्तु इसे व्याख्यायित करने का श्रेय डेनियल गोलमैन को दिया जाता है। सन् 1995 ई. में गोलमैन द्वारा प्रकाशित पुस्तक Emotional intelligence why it can matter more than IQ[125] ने संवेगात्मक बुद्धि के सम्प्रत्यय को व्यापक पहचान प्रदान किया।

---

[122] शोध छात्र, श्री लाल बहादुर शास्त्री राष्ट्रीय, संस्कृत विद्यापीठ नई दिल्ली
[123] "धीः प्रज्ञा शेमुषी मतिः"- अमरकोशः धीवर्गः 1
[124] शोधप्रबन्ध, वाइने पेइनी (Wayne Payne)
[125] शोधप्रबन्ध, गोलमैन

संवेगात्मक बुद्धि दो शब्द संवेग एवं बुद्धि का मेल है, इसका ये मतलब कदापि नहीं है कि भावनाओं पर बुद्धि की विजय होती है । वस्तुत: संवेगात्मक बुद्धि तो भावना/संवेग अर्थात् दिल व दिमाग का अनुपम संयोग है अर्थात् हम कह सकते है कि भावात्मक बुद्धि या संवेगात्मक बुद्धि हमारी क्षमता है जिसके द्वारा हम अपना समाधान करते हैं अर्थात् एक बेहतर एवं गुणात्मक रूप से उत्तम और प्रभावशाली जीवन जीने का प्रयास करते हैं। क्योंकि यदि भावना हो परन्तु बुद्धि नहीं, या फिर बुद्धि हो लेकिन भावना नहीं, तो इससे हमारी समस्याओं का आंशिक समाधान ही संभव हो पायेगा। अर्थात् संवेग एवं बुद्धि हमारे संतुलित एवं समायोजित जीवन रूपी एक सिक्के के दो पहलू है जिसमें एक के बिना दूसरा अधूरा है यानी दोनों समान रूप से महत्वपूर्ण है। कुछ विद्वान् संवेगात्मक बुद्धि के चार तत्व मानते हैं[126] –

1 स्व बोध (Self Awareness)

2 स्व प्रबंधन (Self management)

3 समाजिक बोध (Social Awareness)

4 संबंध प्रबंधन (Relationship Management)

★ स्वबोध से तात्पर्य व्यक्ति के द्वारा अपने व्यवहार पर संवेगों के प्रभाव को समझना एवं अपने सकारात्मक एवं नकारात्मक भावनाओं के विभिन्न पक्षों को जानना।

★ स्व प्रबंधन से तात्पर्य स्वयं के संवेगों को समझकर उसके विपरीत परिस्थितियों में नियंत्रित रखना, विभिन्न परिस्थितियों में समायोजित होना एवं उसका सही समय पर अच्छी तरह उपयोग करना ।

★ सामाजिक बोध का अभिप्राय दूसरे के संवेगों को समझना, उनसे सहज व्यवहार करना , उन्हें स्वीकार करने से है ।

★ सम्बन्ध प्रबन्धन अर्थात् स्वयं का अन्य दूसरे लोगों के साथ संवेगों पर नियंत्रण रखकर उचित व्यवहार करना , सम्बन्ध बनाना एवं उसे बनाये रखना, मार्गदर्शन करना, प्रेरित करना, समस्या का समाधान करना आदि से सम्बंधित है।

इस प्रकार “संवेगात्मक बुद्धि स्व की एवं दूसरे की भावनाओं व्यवहार अथवा संवेगों को समझना, सम्बन्ध जोड़ लेना, व्यक्त करना, लागू करना एवं नियंत्रित करके दीर्घकालीन बनाये रखने की योग्यता है। “संवेगात्मक बुद्धि एवं शिक्षा (Emotional intelligence and Education)

अरस्तू “कोई भी व्यक्ति गुस्सा हो सकता है ये आसान है, लेकिन सही व्यक्ति से गुस्सा होना, सही मात्रा में गुस्सा होना, सही कारण से गुस्सा होना और सही तरीके से गुस्सा करना बहुत कठिन कार्य है।"[127]

आधुनिक अनुसंधान से ये ज्ञात होता है कि बुद्धिलब्धि व्यक्ति के जीवन के सफलता में 20% भाग निर्धारित करता है परन्तु भावात्मक/संवेगात्मक बुद्धि व्यक्ति के जीवन में 80% भाग निर्धारित करता है।

इस बदलते परिवेश एवं भारी बस्ता के तले दबते बच्चों के लिए विद्यालय, शिक्षक एवं अभिभावक को संवेगात्मक बुद्धि से परिचित कराना अत्यंत आवश्यक हो गया है । क्योंकि विद्यार्थी एक दूसरे से

126 अरुण कुमार सिंह, शिक्षा मनोविज्ञान, 2008

127 गुप्ता एस. पी. एवं गुप्ता अलका 2012 उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, इलाहाबाद





आगे बढ़ने के होड़ में धैर्य खोते जा रहे हैं और अपना मूल्यवान् जीवन दाँव पर लगा दिया है। अभिभावक को ये ज्ञात नहीं है कि बालक के हृदय को शिक्षित करना उतना ही आवश्यक होता है जितना बालक के मस्तिष्क को शिक्षित करना जरूरी होता है। संवेगात्मक बुद्धि के विकास के लिए बालक को खुले एवं स्वस्थ वातावरण के साथ-साथ परिजनों, साथियों, शिक्षकों, पास-पड़ोस एवं विद्यालय आदि की मुख्य भूमिका होती है। इसके लिए बालक को किताबों के पढ़ने के साथ-साथ निम्नलिखित पक्षों के लिए भी समय देना अत्यंत आवश्यक है । जैसे कि आदर्श व्यक्तियों का अभिनय करना, अभिप्रेरित करने वाली कहानियाँ सुनाना एवं स्वयं पढ़ने के लिए प्रेरित करना,ध्यान-योग क्रियाओं में भाग लेना, विद्यालय में सकारात्मक सांस्कृतिक कार्यक्रम करवाना एवं बालकों को अधिक से अधिक भाग लेने के लिए प्रेरित करना, सामाजिक सकारात्मक गतिविधियों में बढ़ चढ़ कर हिस्सा लेना आदि । क्रियाकलापोंद्वारा बालकों में संवेगात्मक बुद्धि का विकास किया जा सकता है । साथ ही इन क्रियाकलापों को इस प्रकार से उनके जीवन में लागू किया जाय कि स्थायी आदत के रूप में परिमार्जित हो सके जिससे विपरीत परिस्थितियों में अथवा तनाव में भी वे अपने संवेगों पर नियंत्रण करके उस परिथिति से लाभ उठा सके एवं स्वयं के व्यवहार को अनुकूल करके अनुभव प्राप्त करने एवं निर्णय लेने में सक्षम हो सके । इसके अतिरिक्त बालकों में निम्न योग्यताओं को विकसित करने पर उनमें संवेगात्मक बुद्धि का विकास सम्भव हो सकता है :- सम्प्रेषण, स्व-जागरूकता, विनम्रता, सहभागिता, स्व- नियंत्रण, स्व-अभिप्रेरणा, धैर्य, समस्या- समाधान, निर्णय लेना, श्रव्य क्षमता, उचित देखभाल आदि बातों के प्रशिक्षण से संवेगात्मक बुद्धि को बढ़ाया जा सकता है । जिससे बालक अपने तनाव को कम करके, संवेगों को पहचान करके एवं उसका उचित प्रयोग करके सु-समायोजित, सफल व सुखी जीवन की ओर अग्रसर हो सकता है ।

## सन्दर्भग्रन्थसूची

1. सिंह अरुण कुमार 2008 शिक्षा मनोविज्ञान,मोतीलाल बनारसीदास
2. सिंह अरुण कुमार,2005 उच्चतर सामान्य मनोविज्ञान,मोतीलाल बनारसीदास
3. गुप्ता एस. पी. एवं गुप्ता अलका 2012 उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, इलाहाबाद
4. पाण्डेय, के. पी. (2009), नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय प्रकाशन,
वाराणसी (उत्तरप्रदेश)
5. सक्सेना, एन. आर. स्वरूप (2001), शिक्षा के सामाजिक एवं समाजशास्त्रीय सिद्धान्त, सूर्या पब्लिकेशन, मेरठ
6. मंगल, एस. के., मंगल, शुभ्रा (2019), अधिगम एवं विकास का मनोविज्ञान, पी. एच. आई प्राइवेट लिमिटेड, देहली
7. मिनिस्ट्री ऑफ ह्यूमन रिसोर्स डेवेलपमेंट (2020) नेशनल एजुकेशन पॉलिसी 2020 न्यू दिल्ली: गगनमेंट ऑफ इंडिया
8. सेंट्रल बोर्ड ऑफ सेकेन्डरी एजुकेशन (2018) सेकेन्डरी स्कूल करिकुलम न्यू
दिल्ली सीबीएसई
9. नेशनल काउंसिल फॉर एजूकेशनल रिसर्च एंड ट्रेनिंग (2012) कंटिन्युअस ऍंड.कम्प्रेसिव इवैल्यूएशन गाइडलाइंस, न्यू दिल्ली एनसीईआरटी
10. माथुर, एस. एस. (1978), शिक्षा मनोविज्ञान, विनोद पुस्तक मन्दिर, आगरा

Since 2010
ISSN- 0976-8645
UGC RN-41039

# सौतान्त्रिक दर्शने 'परमार्थ' -विचारः

डॉ. सोनल सिंहः[128]

## कुञ्चिशब्दाः

समाधिः, प्रतीत्य, सम्यग्ज्ञान,अविद्या,शून्यता

## शोधसारः

शीलं समाधिः प्रज्ञा चेति त्रयः समस्तस्य बुद्ध-उपदिष्टस्य धर्मस्य आधारस्तम्भाः। तत्र अपि प्रज्ञा एव मूलं वा। प्रज्ञा उत्पादार्थम् एव शील – समाधिमानाम् आरम्भः।[129] समाधितः प्रज्ञा[130], समाधिश्च शीलेन्[131] इति नियमः। प्रज्ञा च यथार्थज्ञानं सम्यग्ज्ञानं वा। प्रज्ञाया एव निरूपणाय तद् अधिगमाय च समेषां बौद्धदार्शिकानां प्रस्थानानां प्रादुर्भावः। अनित्यता, दुःखता,अनात्मता, शून्यता, प्रतीत्यसमुत्पादः,बन्धमौक्षौ, कर्म- तत्फले अविद्यादीनि सुबहूनि दर्शनानाम् एषां विचारस्थलानि,तथापि सम्यग्ज्ञानोत्पादाय तत्त्वमीमांसा प्रमाणमीमांसायां चेति द्वयं प्रधानम्।

=====================================

भगवता बुद्धेन साक्षात् उपदिष्टानि सूत्राणि ये अनुसरन्ति, ते सौतान्त्रिका इति सामान्य निर्वचनम् प्राप्यते।

पालि- अट्ठकथायां प्राप्यते।-

**अत्थानं सूचनतो सुवुत्ततो सवनतो थ सूदनतो।**
**सुत्ताणा सुत्तसभागतो च सुत्तं सुत्तं ति अक्खातं।।**[132]

अग्रे पाणिनिधातुपाठे अस्य निर्वचनम् प्राप्यते।– सूत्र- धातोः[133] अचप्रत्येन निष्पन्नः सूत्रशब्दोऽल्पाक्षरो अपि बहूनर्थान् आत्मनि वेष्टयति[134]। चीनदेशीयविदूषा वेछग् महोदयेन प्रणीतायां सन्धिनिर्मोचनसूत्रव्याख्याम् अपि सूत्र- शब्दस्य संग्रथनं संश्लेषणं।

एव अर्थः निर्दिष्टः। तथा च अभिधर्मकोशभाष्यटीकायां स्फुटार्थाख्यायाम् आचार्ययशोमित्रो अपि सौतान्त्रिकपदं व्याख्या कृतम्- प्रश्नः प्राप्यते- **कः सौतान्त्रिकाः ?** उत्तरस्वरूपं प्राप्यते - ये सूत्रप्रामाणिकाः, न तु शास्त्रप्रामाणिकास्ते

[128] पोस्ट डाक्टोरल फेलो, केन्द्रीय संस्कृत विश्वविद्यालय

[129] इमं परिकरं सर्व प्रज्ञार्थ हि मुनिर्जगौ।
तस्मादुत्पादयेत्प्रज्ञां दुःखनिवृत्तिकाक्षंया।। बोधिचर्यावतारः 9.1, शान्ति भिक्षु शास्त्री प्रथम संस्करण 1955

[130] समादितो यथाभूतं प्रजानीत्यवदन् मुनिः। शिक्षासमुच्चयः का. 9

[131] सीले पतिट्ठाय नरो, चित्तं पञ्ञं च भावयं
आतापी निपको भिक्खु, को इमं विजटये जटं ति।।
विशुद्धिमग्गो पठमो भागो स्वामी द्वरिकादासशास्त्री 2006 पृ- 1

[132] तं हि अत्थपरत्थादिभेदे अत्थे सूचेति। सुवुत्ता चेत्थ अत्था वेनेय्यज्झासयानुलोमेन वुत्तता। सवति चेतं अत्थे, सस्समिव फलं, पसवती ति वुट्ठं होति । सीदति चेतं धेनु विय सारं पग्घरती ति वुत्तं होति। सुट्ठु च ने तायति रक्खती ति वुत्तं होति। सुत्तसभागं चेत्। यथा हि तच्छकानं सूत्तपमाणं होति एवमेतं पि विञ्ञूनं । यथा च सुत्तेन सङ्गहितानि पुप्फानि न विकिरयन्ति विद्धंसियन्ति एवमेतेन सङ्गहिता अत्था। अट्ठसालिनी ( धम्मसंगणि अट्ठकथा ) पृ 39 सम्पूर्णानन्द संस्कृत विश्वविद्यालय 1989

[133] पाणिनिधातुपाठ 1908 चुरादिगणे।, सौतान्त्रिकदर्शनम् , के. उ. ति. शि. सं. 2008 पृ 141

[134] अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मूखम।.....पाराशरोपूराणम् 18:13-14, सौतान्त्रिकदर्शनम् , के. उ. ति. शि. सं. 2008 पृ 141




Since 2010
ISSN- 0976-8645
UGC RN-41039

सौतान्त्रिकाः। यदि न शास्त्रप्रामाणिकास्ते सौतान्त्रिकाः , कथे तेषां पिटकत्रय व्यवस्था- सूत्रपिटकः,विनयपिटकः अभिधर्मपिटक इति, सूत्रेऽपि ह्यभिधर्मपिटकः पञ्यते- त्रैपिटिको भिक्षुरिति ? नोष दोषः सूत्रविशेषा एव हि अर्थविनिश्चयादयोऽभिधर्मसंज्ञा येषु धर्मलक्षमं वर्ण्यते एतद् आशङ्का निवृत्त्यर्थमाहू। यय तु प्रकीर्ण उक्तो भगवतेति।[135]

**भेदाः-** सौतान्त्रिकदर्शनं धाराद्वये प्रविभक्तं सुस्थिरं च समभूत। तथाहि- (1) आगमानुयायिनः (2) युक्त्यनुयायिनश्च सौतान्त्रिका इति।

आगमानुयायिनः सौतान्त्रिकाः- ये खलु आगमानां (सूत्राणां) साक्षात् अभिधामूलकत्वेन शब्दशः प्रामाण्यं प्राधान्यं अङ्गीकृत्य तत् मूलकतया स्वसिद्धान्तान् प्रतिष्ठापयामासुस्त आगमानुयायिनः उत्यन्ते।

युक्त्यनुयायिनः- ये खलु प्रमाणशास्त्रे निर्दिष्टानां युक्तीनामाधारेण स्वसिद्धान्तव्यवस्थाम् अनुष्ठितवन्तः युक्तिभिः एव बुद्धवचनानाम् अपि सम्यत्त्वं व्याख्यातवन्तस्ते हि युक्त्यनुयायिनः इत्याख्यया लोके प्रथिताः।

**सत्यद्वयम्-** भगवतो बुद्धस्य सर्वे उपदेशा सत्यद्वयमाश्रिता[136]। सत्यद्वयं परमार्थसत्यं संवृत्तिसत्यं च। आचार्य मैत्रेयनाथः सत्यद्वयातिरिक्ताः पि मन्यन्ते।– यथा- उत्तरतन्त्रे सप्त वज्रपदानीति[137], मध्यान्तविभागे पि सप्तार्था[138], अष्टौ पदार्था अभिसमयालङ्कार इति[139], माध्यमिकशास्त्रे सत्यद्वयमपि स्वीक्रीयते।[140] तथा च सौतान्त्रिक मतानुसारामपि सत्यं द्विविधं स्वीक्रीयते। संवृत्तिसत्यं परमार्थसत्यञ्च।

**संवृत्तिसत्यं**[141]- संवृति अर्थात् 'मृषा (भ्रम)'[142] एव व्याप्तः, परमार्थिकी सत्ता नास्ति । मिथ्यादृष्टि अपि

[135] स्फुटार्था अभिधर्मकोशव्याख्या, पृ 13 बौद्धभारतीसंस्करण 2008

[136] दे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना।
लोकसंवृत्तिसत्यं च सत्यं च परमार्थतः।
मूलमाध्यनिककारिका, नागार्जुनकृता 24 - 8

[137] बुद्धश्च धर्मश्च गणश्च धातुबोधिर्गुणा कर्म च बौद्ध मन्त्यम्।
कृत्स्नस्य शास्त्रस्य शरीरमेतत् समासतो वद्रपदानि सप्त।।
रत्नगोत्रविभागो नाम महायोनोत्तरशास्त्रम्, आर्यमैत्रेयनाथकृतम्, पृ 1( पटना 1950)

[138] लक्षणं ह्यवृतिस्तत्त्वं प्रतिपक्षस्य भावना।
तत्रावस्था फलप्राप्तिर्यानानुत्तर्यमेव च।। इत्येते सप्तार्था ह्यस्मिन् शास्त्र उपदिश्यन्ते। यदूत- लक्षणम् , आवरणम्, तत्त्वम, प्रतिपक्षस्य भावना, तस्यामेव च प्रतिपक्षभावनायामवस्था, फलप्राप्तिः यानानुत्तर्यः च सप्तमोऽर्थः मध्यान्तविभागः पृ 6 रामचन्द्रपाण्डेयसम्पादितः 1971

[139] प्रज्ञापारमिताऽष्टाभिः पदार्थैः समुदीरिता।
सर्वाकारज्ञतामार्गज्ञता सर्वज्ञता ततः।।
सर्वाकाराभिसम्बोधो मूर्धप्राप्तोऽनुपूर्विकः।
एकक्षणाभिसम्बोधो धर्मकायश्च तेऽष्टधा।।
अभिसमयालङ्कारवृत्ति। स्फुटार्था 1 : 4 (केन्द्रीयतिब्बतीशिक्षासंस्थान ,सारनाथ- संस्करणं 1977)

[140] संवृत्तिः परमार्थश्च सत्यद्वयमिदं मतम्।
बुद्धेरगोचरस्ततत्त्वं बुद्धि संवृतिरुच्यते।। बोधिचर्यावतारः शान्तिदेवकृतः 9 : 2 दरभंगा संस्करण 1960

[141] समन्ताद् वरणं संवृति। अज्ञानं हि समन्तात् सर्वपदार्थ तत्त्वाछादनात् संवृतिरूच्यते। पी.एल वौद्य मध्यमकशास्त्र पृ 240

[142] सम्यङ्ग्मृषादर्शनलब्धभावं रूपद्वयं विभ्रति सर्वभावाः,
सम्यग्दृषा यो विषयः सो तत्त्वं मृषादृशा संवृतिसत्यमुक्तम्।।
मध्यामकावतार 6-23

Since 2010
ISSN- 0976-8645
UGC RN-41039

द्विविद्या भवति।– शुद्ध-इन्द्रियः, अशुद्ध- इन्द्रियश्च।

**मृषादिशोऽपि द्विविद्यास्त इष्टा, म्तेन्द्रियः इन्द्रियदोषवन्तः। दुष्टेन्द्रियाणां किल बोध इष्टः सुस्थेन्द्रियज्ञानमपेक्ष्य मिथ्या।।**[143]

अभिलापमपि संवृत्ति उत्यते। संवृत्तिस्तेन ग्राह्यं संवृत्तिसत्यमिति। अपि च, नाम-अभिधान-प्रज्ञप्ति-र्व्यहार इतीमा यद्यपि संवृतयस्तथापि स्वरूपेण स्वलक्षणभूताः परमार्थसत्यश्चेति नास्ति विरोधः[144]। संक्लेशालम्बनं संवृतिसत्यम्, व्यवदानालम्बनं च परमार्थसत्यमित्यन्ते। मते अस्मिन्न अपि दुःख समुदयो आर्य मार्गालम्बनत्व हानिदोषः प्रसज्यते।

संवृत्तिसत्यस्य व्युत्पत्तिः प्राप्यते- यो हि धर्मः संवरणात्मिकायां कल्पनाबुद्धौ सत्यमेव भाति तत् संवृतिसत्यम्। एवमेव यद्धि वस्तु परमायां निर्विकल्पायां बुद्धौ सत्यं तत् परमार्थसदिति। अतश्च या खलु बुद्धिः स्वलक्षणं साक्षात् प्रतिभासमानविषयरूपेण ग्रहीतुम् आवरणं करोति, सा संवृतिः। कल्पनात्मिकायाम् एव प्रतीतौ तावत् स्वलक्षणं सावरणमुपदर्शितं भवति अतः सैव संवृतिरिति। परमपि ज्ञानं अभ्रान्तं च ज्ञानमभिप्रेतम्।

भेदाः- अस्य त्रयः भेदा परिदृश्यन्ते।[145] - 1-प्रज्ञप्तिसंवृतिः 2-प्रतिपत्तिसंवृतिः 3-उदभावनसंवृत्ति।[146]

तया त्रिविधया संवृत्या संवृतिसत्यं सिद्धं भवति। तथा हि- संवृतिर्व्यवहारः प्रज्ञप्तिरभिधानमात्रेण व्यवहारः प्रज्ञप्तिसंवृतिः। अत एवार्थाभावात् प्रज्ञप्तिसंवृत्या परिकल्पितः संवृतिसत्यम्। अविद्यमानेऽर्थेऽर्थाभिनिवेशः प्रतिपत्तिस्तया व्यवहारः परतन्त्रः स्वभाव। सा पुनः अभिनिवेशः विकल्पः । तस्मात् प्रतिपत्तिसमवृत्या संवृतिसत्यं परतन्त्र स्वभावः तथाता आदि शब्दैः निरभिलापस्य धर्मधातोर्या संसूचना, सोदभावना तया धर्मधातोर्व्यवहार उद्भावना संवृतिः।

**परमार्थसत्यम्-** तत्र पालनपूरणार्थकात् पृ धातो[147] परम्- शब्दो व्युत्पन्नो भवति, तेन पूर्णः इति तस्यार्थः। अथवा परम् इत्यव्यनेन श्रेष्ठ- उत्तम-प्रधान-अर्थकः परमशब्दो निष्पद्यते।[148] फलतः पूर्ण-प्रधान-सर्वोत्कृष्टश्रेष्ठत्वादयो अर्था भवन्ति।

बौद्ध सम्प्रदायेषु परमार्थ-शब्दस्य बहुविद्या व्युत्पत्तयो दृश्यन्ते, तासु तिस्रः प्रमुखाः। तथा हि- परम उत्तमोविपरीतोऽर्थः परमार्थः[149]। परमशब्दः प्रणीतार्थकः[150]। प्रधानार्थकश्चाप्युपवर्ण्यते[151]। अग्रे

[143] देव आचार्य नरेन्द्र, बौद्ध धर्म दर्शन पृ 554

[144] व्याख्यायुक्ति, आचार्यवसुवन्धुकृता भोटभाषायां तनग्युर संग्रहे।

[145] प्रज्ञप्तिप्रतिपत्तितः। तथाद्भावनयौदारम्। मध्यान्तविभागशास्त्रम् 3-10 रामचन्द्रपाण्डेयसम्पादितः 1971, पृ 94

[146] मध्यान्तविभागशास्त्रम् वसुवन्धुकृतम् , तत्रैव

[147] पाणिनीयधातुपाठ पृ- पालनपूरणयोः 1086

[148] प्राप्नोति परमां गतिम् द्र मनुस्मृतिः 4-14, 7-1 सौतान्त्रिककदर्शन पृ 148

[149] विभावनी अभिधम्मत्थसंगहटीका पृ 6, सौतान्त्रिककदर्शन पृ 148

[150] धम्मसंगणि पृ 236 नालन्दासंस्करण

[151] अविपरीतभावतो येव परमो पधानो अत्थो ति परमत्थो। कथावत्थु, सौतान्त्रिककदर्शन पृ 148



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal) published by सारस्वत-निकेतनम्
Avilable at jahnavisanskritejournal.in Issue 49 Vol- IV Year 13. July-Sep, 2022 JSEJ/49/IV/1/2023
Since 2010
ISSN- 0976-8645
UGC RN-41039

प्राप्यते परमम् उत्तमं ज्ञानं, तस्य विषयः परमार्थः।[152] परमम् अनास्रवज्ञानं तस्यालम्बनं परमार्थः।[153] इयं व्युत्पत्ति महायानदर्शनसम्मता। उपर्यक्ता, तिसृषु व्युत्तपत्तिषु प्रथमया व्युत्तपत्या तदेव परमार्थतत्वम्। यदातमनः स्वरूपं स्वयमेव अभिव्यक्ति यत्र वा न अध्यारोप संप्लव- संस्पर्शलेशः।

एतत् मतानुसारं परमं निर्विकल्पकं ज्ञानम् तस्य विषयः परमार्थः। अनया व्युत्पत्त्या तदेव परमार्थतत्त्वं यद् अभ्रान्तस्य निर्विकल्पकस्य ज्ञानस्य साक्षाद् आलम्बनम्। अन्य च परम उत्कृष्टो अर्थः परमार्थः। अनया परिभाषया तदेव परमार्थसद् यद् अर्थक्रियाकारित्वसमर्थम्। यो हि धर्मः स्वग्राहकज्ञाने स्वाकारमर्पयितुं साक्षात् समर्थः स परमार्थः तच्च स्वलक्षणम्। स्वम् असाधारणं लक्षणं तत्त्वं स्वलक्षणं।

**अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्।**
**अन्यत् संवृतिसत् प्रोक्तं ते**
**स्व-सामान्यलक्षणे**[154]।।

महायानपरम्परायानुसारं परमार्थसत्यस्य कृते उच्यते।– कुतस्तत्र परमार्थो वाचां प्रवृत्ति कुतो वाः ज्ञानस्य।[155] अर्थात् परमार्थो अवाच्योऽस्ति कोऽपि वक्तुं न शक्यते अस्य विषये, सः आर्यजनस्य विषयः अस्ति।[156] **स हि परमार्थो अपरऽपरप्रत्ययः शान्तः प्रत्ययात्मवेद्यार्याणां सर्वप्रपञ्चातीतः।** बोधिचर्यावतारे पञ्जिकाकारो वदति।– शून्यता, तथता, भूतकोटि-धर्मधातुरित्यादि पर्यायाः।[157]

निष्कर्षरूपेण प्राप्यते यत् अन्यदार्शनिकानां इव सौतान्त्रिका अपि भगवतो बुद्धस्य सत्यद्वयदेशना अनुसरन्ति किन्तु व्याख्या एव तत्त्वजातं सूक्ष्मतया विवेचयन्ति। सत्यद्वयविरूपेण ते खलु अन्त द्वयं सम्यक् परिहृत्य स्वकीयसिद्धान्तजातं मध्यमया प्रतिपदा अनुप्राणितं साधयन्ति। इदं एव तेषां वैशिष्टयं यद इमे सत्यद्वयव्यवस्थानं सर्वसाधारणं लौकिकज्ञानम् एव आधृत्य निरूपयन्ति। इयं हि तेषां परमार्थशब्दव्युत्तपत्तिः तथा हि परं प्रत्यक्षज्ञानं निर्विकल्पं अभ्रान्तं लौकिकं, तस्य अर्थो गोचरो विषयालम्बनं परमार्थः। परमार्थव्यवस्थापनं न योगीप्रत्यक्षं लोकोत्तरम् अनास्रवं ज्ञानमाधृत्य निरूपयन्ति, अपि तु सर्वसाधारणं लौकिकज्ञानमपेक्ष्य एव विदझति।[158] अनया व्याख्या प्राप्यते परमः स्वभावतोऽर्थक्रियासमर्थः कार्योत्पादक्षमः अर्थो च वस्तुसन् धर्मः परमार्थः। अत्यन्तं हि भावानां कार्य बुद्धि यत् खलु ताम अपि न उत्पादयितुं क्षमं तत् संवृतिसत्। यद् वा सङ्केतसंस्कारादिनिमित्तनाम् अपेक्षया उपलब्धस्वभावं तत् तावत् संवृतिसत्।

इत्थं प्रकारेण सौतान्त्रिकदर्शनं अन्तद्वयं विनिर्मुक्तं राजते। व्यावृत्तिमात्र आधारेण अत्र संवृतिसत्यम् अर्थक्रियाकारित्व आधारेण च परमार्थसत्यं सम्यग्

[152] भिन्नेऽपि विषये यदर्थिका बुद्धिर्न विनश्यति, तस्या विषयः परमार्थः। अभिधर्मकोश वसुवन्धु 6-4

[153] सम्यग्दृशां यो विषयः स तत्तवं मृषादृशां संवृतिसत्यमुक्तम्। मध्यमकावतार 6-23

[154] प्रमाणवार्तिक 2-1, बौद्ध भारती संस्करण 1986

[155] वैद्य, पी. एल. मध्यमकशास्त्र पृ 241

[156] वैद्य, पी. एल. मध्यमकशास्त्र पृ 241

[157] बोधिचर्यावतार,नवम परिच्छेद, पृ 97 (पंजिका 354) शान्ति भिक्षु शास्त्री, गौतम बुक सेन्टर 1955

[158] सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते। न्यायबिन्दु प्रथम सूत्र धर्मोत्तर –दुर्वेकमिश्र व्याख्यानसंकलितम् एव

व्यवस्थाप्यते। अपरः च इमे क्षणभङ्गसिद्धान्तेन शाश्वतान्तम्, अर्थक्रियासामर्थ्यसिद्धान्तेन च उच्छेदान्तं सम्यक् परिहरन्ति।

## सन्दर्भग्रन्थसूची

1-अट्ठसालिनी (धम्मसंगणी अट्ठकथा) सम्पूर्णानन्द संस्कृत विश्वविद्यालय 1989

2-अभिधर्मकोशम् आचार्यवसुबन्धुविरचिम् स्वामी द्वारिकादासशास्त्री, बौद्ध भारती ग्रन्थमाला 2008

3-अभिसमयालङ्कारवृत्ति। स्फुटार्था केन्द्रीयतिब्बतीशिक्षासंस्थान ,सारनाथ- संस्करणं 1977

4-प्रमाणवार्तिक बौद्ध भारती संस्करण 1986

5-बोधिचर्यावतारः शान्ति भिक्षु शास्त्री प्रथम संस्करण 1955

6-मध्यमकावतार ,पी.एल. वैद्य,मिथिला विद्यापीठ 1987

7-मध्यान्तविभागशास्त्रम्, रामचन्द्रपाण्डेय, मोतीलाल वनारसीदास ,1999

8-मूलमाध्यमिककारिका, नागार्जुनकृता ,डॉ एच चटर्जी, कलकत्ता 1962

9-विशुद्धिमग्गो पठमो भागो स्वामी द्वरिकादासशास्त्री 2006

10-रत्नगोत्रविभागो नाम महायोनोत्तरशास्त्रम्, आर्यमैत्रेयनाथकृतम्, पटना 1950

11- सौतात्रिकदर्शन, रामशंकरत्रिपाठी, के.उ. ति. शि.सं. 2008





# CALL FOR PAPERS

## Important dates for next Issue-

**DEADLINE FOR SUBMISSION- 01.02. 2023**
**NOTIFICATION FOR ACCEPTANCE-15.02.2023**
**INAUGRATION-28.02.2023**



# SEND YOUR PAPER

**ध्यान दें- सिर्फ प्रदत्त लिंक द्वारा ही शोधपत्र स्वीकार्य हैसाथ ही वर्ड फ़ाइल यूनीकोड में ही टाइप हो एवं अधोलिखित क्रम में ही हो अन्यथा प्रेषित आलेख पर विचार नहीं किया जाएगा।**

1. शीर्षक
2. लेखक का नाम
3. पद
4. संस्था
5. ई-मेल
6. मोबाइल
7. Keywords
8. शोधसार (दो-तीन पाराग्राफ में आलेख के विषयवस्तु को स्पष्ट करे)
9. मूल शोधपत्र
10. सन्दर्भ(Footnote etc.
11. सन्दर्भग्रन्थसूची( प्रकाशक,वर्ष आदि विवरण के साथ)



# CONTACT

jahnavisanskritjournal@gmail.com